वर्षम् 72
अङ्कः -09
आषाढमासः
विक्रमाब्दः 2079
युगाब्दः 5124
जुलाई, 2022

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख

आषाढी पूर्णिमा व्यासपूर्णिमा गुरुपूर्णिमा।
सर्वत्र भारते शिष्यैर्वन्द्यते प्रवचन् गुरुः।।



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | सिद्धतालीला | डॉ.अञ्जना शर्मा | ५ |
| ३ | भवानीभवनक्षत्रमाला | डॉ. हरिसिंहराजपुरोहितः 'राजहरिः' | ११ |
| ४ | तव कथामृतम् | आचार्यः पं.नथमलशास्त्रीदाधीचः | १३ |
| ५ | श्रीज्ञानवापीशिवः | प्रो.ताराशंकरशर्मा पाण्डेयः | १५ |
| ६ | भारतानां भूः | अमरदत्तशर्माः | १६ |
| ७ | सम्पत्कुमारसम्भवम् | डॉ. के. मल्लिका | १७ |
| ८ | त्वां कथं विस्मरेयम् | महेशनारायणशर्मा | २१ |
| ९ | महाभारतस्य विकासो विस्तारो वा | डॉ. रमेशचन्द्बुनकरः | २२ |
| १० | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २६ |
| ११ | पदप्रहेलिका - 1 | मधुसूदनशर्मा ( प्राध्यापकः ) | २८ |
| १२ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १३ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

दूरभाषः 0141-2379014, मो. 9799011085

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका:

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णाकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -09
आषाढमासः
विक्रमाब्दः 2079
युगाब्दः 5124
जुलाई , 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# शिष्याणां बुद्धिदानेन गुरुः सन्तापहारकः

...✍ प्रोफेसर श्रीकृष्णशर्मा

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।**
**तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।**

पुरा काले गुरु-शिष्ययोः पिता-पुत्रवत् प्रगाढः पवित्रश्च सम्बन्ध आसीत्। पुण्यभूरियं भारतभूमिः गुरुकुलैराकीर्णाऽऽसीत्। **'गुरु' शब्दस्य नैकधा व्युत्पत्तयः**। तथाहि –

सेचनार्थ को 'गृ' धातुर्भ्वादिकः। अतो गरति= सिञ्चति कर्णयोर्ज्ञानामृतम् इति **गुरु**र्भवति। 'गृ' विज्ञाने इति चौरादिगणीयो धातुः। तेन गारयते = विजानीते शास्त्ररहस्यमिति **'गुरुः'**। विशिष्टज्ञाननिधिरित्यर्थः। क्र्यादिगणीयोऽपि शब्दार्थको 'गृ' धातुः। तस्माद् गृणाति = उपदिशति धर्मादिरहस्यम् इति **गुरुः**। 'गृ' निगरणे इति तुदादिगणे पठितो धातुः। तस्मादपि गिरति= अज्ञानं नाशयतीति व्युत्पत्तौ **गुरुः**। सर्वत्र 'कृग्रोरुच्च' इत्युणादिसूत्रेण 'उ' प्रत्ययः उकारान्तादेशश्च, 'उरण् रपरः' इति रपरत्वे 'गुरु' शब्दो निष्पद्यते।

गुरुरेव ज्ञान – विनय – संस्कार – सदाचारादी – नाम् आधानं करोति शिष्येषु, अतः शिष्याणां कृते सः सर्वस्वम्। अधिगत ज्ञान-विज्ञान कौशलो गुरुः शिष्येषु ज्ञानविज्ञानादीन् नैपुण्येन संक्रामयति। तदेवोक्तं महाकविना **कालिदासेन** मालविकाग्निमित्रनाटके (1.16) –

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था,**
**संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणाम्,**
**धुरि प्रतिष्ठापयितव्य एव।।** इति।

गुरुप्रदत्ताशीर्भिः शिष्योऽपरिमितं सामर्थ्यमवाप्नोति। तेन च जीवनस्य साफल्यम्, ज्ञानञ्चाधिगच्छति। तेनानघो भूत्वा सुमङ्गली भवति शिष्यः। एतदन्वर्थकश्चायं आगमसारश्लोकः –

**गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः।**
**उकारः शिव इत्युक्तस्त्रितयात्मा गुरुः स्मृतः।** इति।

अतः सर्वार्थप्रकाशको गुरुः साक्षात् परमात्मरूपो मतः। यथा लोकेषु सर्वार्थप्रकाशकत्वात् सूर्यः प्रजानां प्राणस्वरूपः, तथैव शिष्येषु कर्तव्याकर्तव्यस्य विवेकात्मकबुद्धेराधानात् गुरुः सर्वार्थप्रकाशको मन्यते–

**सर्वेषामेव लोकानां यथा सूर्यः प्रकाशकः।**
**गुरुः प्रकाशकस्तद्वच्छिष्याणां बुद्धिदानतः।।**
(पद्मपुराणे, 2.85.8)

गुरोर्महिमा वर्णनातीतः। नास्ति तत्त्वं गुरोः परम्। अतः समर्पणबुद्ध्याऽऽर्जवभावेन च सेवनीयाः सदा गुरवः। अतोऽध्यापिता ये शिष्याः गुरुं प्रति नाद्रियन्ते तेऽधीतविद्या अपि गुरोः कृपापात्राणि न भवन्ति। पठितमपि शास्त्रं न तान् दुष्टशिष्यान् रक्षतीत्यर्थः। उक्तञ्चैतद् यास्कमुनिना –

**अध्यापिता ये गुरुं नाद्रियन्ते,**
**विप्रा वाचा मनसा कर्मणा वा।**
**यथैव ते न गुरोर्भोजनीयास्-**
**तथैव तान्न भुनक्ति श्रुतं तत्।।**
(निरुक्तम्, 2.1)

गुरुं प्रति जागरूकः सन्नेव शिष्यः स्वकर्तव्यपालनाय सदूर्जामधिगन्तुं शक्तो भवतीति शम्।

**– सम्पादकः**
**आचार्योऽध्यक्षचरश्च, संस्कृतविभागः,**
**जयनारायणव्यासविश्वविद्यालयः,**
**जोधपुरम् (राजस्थानम्)**
**दूरभाषाङ्कः 8386943655**

# सिद्धतालीला

❑ डॉ. अंजना शर्मा

पात्राणि –

- श्रीकृष्णः — मधुमंगलः
- श्रीदामा — वसुदामा
- सुबलः — श्रीराधा
- ललिता — विशाखा
- चित्रा

## प्रथमं दृश्यम्

(नान्द्यन्ते ततः प्रविशति सूत्रधारः।)

सूत्रधारः –

**ललिता शुभदा लीला गोविन्दस्य श्रियेऽस्तु वः।**
**श्रुता स्मृता स्तुता ध्याता कीर्तिता सेविता मुदा।।**

जयतु जयतु ब्रजमण्डलम्।

नटी – अद्य भवान् ब्रजमण्डलस्य जयघोषं करोति।

सूत्रधारः – अहमेव किं नु खलु सर्वे देवा अपि ब्रजमण्डलस्य जयघोषं कुर्वन्ति। ब्रजभुवि श्रीकृष्णस्य अवतारः।

नटी – अहो।

सूत्रधारः – श्रीकृष्णः पूर्णषडैश्वर्यमाधुर्याणां महोदधिः। साक्षाद् भगवान्।

नटी – साक्षाद् भगवान्।

सूत्रधारः – अहो नु खलु, हरेरवतारा असंख्येयाः केचिदंशाः केचित्कला विभूतयश्च किन्तु श्रीकृष्णः स्वयं भगवान् –

**एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।**
**इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे।।**

नटी – तत्त्वतस्तु एक एव।

सूत्रधारः – तत्त्वतः अभेदेऽपि रसेनोत्कृष्टं श्रीकृष्णस्वरूपम्। स सर्वविलक्षण-निज-रूप-गुण-लीलादि-माधुरी-प्रकटनेन सर्वचित्ताकर्षकयोः श्रीमच्चरणारविन्दयोर्भक्तेः प्रदानं करोति दीनहीनजनेष्वपि।

नटी – भगवतो भुवि अवतरणं कथम्?

सूत्रधारः – भगवान् श्रीकृष्णचन्द्रो वैकुण्ठोपरि श्रीमद्गोलोके विहरति, तस्य च परमदुर्लभत्वात् तदीयभक्तिरपि अतिदुष्प्राप्या, तस्या दानार्थं भूतले ब्रजभुवि गोलोकादवतीर्णः।

नटी – भगवतो निजधाम गोलोक एव।

सूत्रधारः – ब्रजमण्डलमपि।

नटी – कथं नु?

सूत्रधारः – यदा भुवो भारहर्तुं देवाः प्रार्थयन्ति तदैव भगवतः श्रीकृष्णस्य स्वशक्त्या राधिकया सह भुवि अवतरणम्। राधा कथयति यत्र वृन्दावनं यमुनानदी गोवर्द्धनो नास्ति तत्र न मे मनो रमते। तदा भगवान् वेदनाग (चतुरशीति) क्रोशभूमिं यमुनां गोवर्द्धनञ्च स्वधाम्नो भुवि प्रेषयामास। अथ च परिकरमपि।

नटी – भवतु विज्ञातम्। परिकरवैशिष्ट्येन रसवैशिष्ट्येन च श्रीकृष्णस्याविर्भाववैशिष्ट्यम्। तदैव अनिर्वाच्या श्रीकृष्णलीलारसमाधुरी। अथ भगवतः का लीला नाटयितव्या।

सूत्रधारः – अद्य तु **'सिद्धतालीला'** नामकम्

एकाङ्करूपकं नाटयितव्यम्।

नटी – मनोहरम्।

सूत्रधार: – पश्य, भगवान् श्रीकृष्ण: सखिभि: सह गोचारणाय गच्छति। आवामपि अनुपदं गच्छाव:।

नटी – आयातु चलाव:।

(इति निष्क्रान्तौ।)

स्थापना

---

(हस्ते दण्डमादाय गोचारकवेषधारिभ: सखिभि: सह श्रीकृष्ण: प्रविशति।)

श्रीकृष्ण: – अये! मधुमंगल! श्रीदामन्! सुबल! वसुदामन्! शीघ्रतां कुर्वन्तु।

मधुमंगल: – (सकौतुकम्) भो: ।का विपत्तिरागता?

श्रीकृष्ण: – (हसन्) विपत्तिर्न, सम्पत्तिरागता।

मधुमंगल: – (साश्चर्यम्) अहो नु खलु।

श्रीकृष्ण: – (सप्रणयम्) पश्यन्तु गोधनम्।

मधुमंगल: – (सानन्दम्) अहा, सम्यगाह गोधनम्–

**घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवा:।**
**घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे।।**

श्रीकृष्ण: – सर्वा गाव हुम्भारवं कुर्वन्ति, गोचारणाय न चलितव्यम्।

मधुमंगल: – चलितव्यम्, चलितव्यम्, किन्तु त्वरया वयं शिक्यादीन् विना एव आगतवन्त:।

श्रीदामा – का चिन्ता, अद्य वयस्य: कृष्ण एव सर्वान् भोजनं कारयिष्यति।

श्रीकृष्ण: – भवतु भवतु।

मधुमंगल: – तर्हि वदतु अद्य गोचारणाय कुत्र चरितव्यम्?

श्रीदामा – वृन्दावनम्।

मधुमंगल: – (सहर्षम्) अहो, वृन्दावनम्, वृन्दावनस्य नाम्ना एव मम विग्रहो रससिक्त:।

श्रीदामा – किम्?

मधुमंगल: – वृन्दावनम् सितोत्पला रसगोलकं वा। प्रतीयते त्वं वृन्दावनविषये न जानासि, शृणु।

श्रीदामा – (सनाट्यम्) न जाने, निवेद्यताम्।

मधुमगल: – वृन्दावनं सारं यथा नवनीतम्।

वसुदामा – कस्य?

मधुमंगल: – सकलवैकुण्ठलोकस्य सारमपि न वै कुण्ठसारमस्य, अथ च।

सुबल: – अथ किम्?

मधुमंगल: – वनमप्यवनाय कल्पते अस्माकम्, अथ च।

श्रीदामा – अथ किमथ किम्?

मधुमंगल: – रसार्थपरिपूर्णम्।

वसुदामा – अहो, कस्य कृते अस्य रचना?

श्रीदामा – भक्तानां कृते।

मधुमंगल: – मैवं, भक्तानां कृते तु अन्यानि बहूनि स्थानानि।

श्रीदामा – तत: किम्?

मधुमंगल: – रसिकानां कृते

श्रीदामा – अहो, तत्र परमरसिक: क:?

मधुमंगल: – (श्रीकृष्णं संकेतयन्) अयम् एव रसिकशेखर:, पदे पदे नवां लीलां रचयति।

श्रीकृष्ण: – (सस्मितम्) का लीला वयस्य! इदानीं तु न अवकाश:, चलन्तु।

(तत: सर्वे वृन्दावनम् आगच्छन्ति। सर्वा गावो घासं चरन्ति।)

श्रीदामा - वयस्य मधुमंगल! यावद् गाव: चरन्ति तावद् एकं गीतं गीयताम्।

सर्वे - ओम्, ओम्, अवश्यमेव गीतं भवेत्।

मधुमंगल: – न तु अहमेव, अस्माभि: सर्वै: मिलित्वा गातव्यम्। अहं तावत् प्रथमं गायामि, पश्चात् सर्वै: मिलित्वा गातव्यम्।

गीयताम् -

**जयति श्रीवृन्दावनम्।**

**केलिसागरं रसाम्बुधे: सारं**
**परमप्रेमस्वरूपं साध्यसाधनं**
**नवं नवं मधुरातिमधुरं त्वमेव।।**
**जयति ........ ।**

**पावनतमं विज्ञानमुख्याखिलात्**
**साधनतमं सर्वार्थलब्धौ हठात्**
**मम पावनं भूषणं जीवनं त्वमेव।।**
**जयति ........ ।**

(सर्वे गायन्ति, तालिं दत्त्वा नृत्यन्ति च)

श्रीकृष्ण: - अतिसुन्दरम्। अतिशोभनम्। अतिमनोहरम्।

मधुमंगल: - साम्प्रतम् अहं बहुश्रान्त:, अतिक्षुधापि मां बाधते। शीघ्रं भोजनं देहि।

वसुदामा - मह्यमपि

श्रीदामा - मम प्राणा उत्क्रामन्ति।

श्रीकृष्ण: - अहं तु न आनीतवान्।

मधुमंगल: – अयि, वयस्य! मैवम्।

श्रीदामा - प्रात:काले एव तु निश्चितं यत् त्वमेव भोजनं कारयिष्यसि।

श्रीकृष्ण: अहो, मया तु विस्मृतम्।

मधुमंगल: – अहो, प्रतीयते तव विस्मृति: मम स्मृति-मात्रमेव न भवेत्।

श्रीदामा – न खलु अथ जठराग्नि: मां पक्ष्यति।

श्रीकृष्ण: - अधुना किं करणीयम्?

श्रीदामा - करणीयं किं, त्वया विस्मृतं, त्वमेव गच्छ, भोजनम् आनय।

श्रीकृष्ण: – मम गाव:।

श्रीदामा - अस्माभि: रक्षितव्या:। त्वं गच्छ।

(श्रीकृष्ण: नन्दभवनं प्रति गच्छति।)

श्रीदामा – आगम्यतां, गा: पश्याम:।

मधुमंगल: – अतिश्रान्तोऽस्मि, गन्तुमशक्त: अत्रैव तिष्ठामि।

श्रीदामा – अत्र किं करिष्यसि।

मधुमंगल: – अये! क्षुधार्तो विप्र: तु स्वपिति।

वसुदामा – सुप्त: जन: न किमपि प्राप्नोति।

मधुमंगल: – अहो, पश्याम:, गोमाता एव रक्षिष्यति।

सुबल: – भो: चिन्तां मा कुरु। अत्रैव सर्वा गावो घासं चरन्ति।

(अपराह्णानन्तरं कृष्णे अनागते सर्वे चिन्तिता:।)

मधुमंगल: – अये श्रीदामन्! यामो गतस्तथापि नायात: वयस्य: कृष्ण:। मम मन: चिन्ताकुलम्।

श्रीदामा – मे मनोऽपि उत्कण्ठितम्।

सुबल: – कोऽपि संकटो न आपतेत्। चलन्तु तं पश्याम:।

वसुदामा – अवश्यमेव। यस्यां दिशि स गत: तस्यां एव चलाम:।

(गोभि: सह सखायो गच्छन्ति।)

यवनिकापात:

### द्वितीयं दृश्यम्

(नन्दभवनं गच्छन् श्रीराधास्मृतित्वेन श्रीकृष्णो वृषभानुपुरम् आयाति। आवृत्य स्वकं रूपं त्रिपुण्ड्धारी च गह्वरवने वृक्षस्य अध आसने विराजते। वृषभानुपुरे चर्चा प्रसृता। राधिकाभवने सख्य राधिकया सह वार्ता कुर्वन्ति।)

ललिता – सखि! अद्य तु अस्माकं पुरे महान् जनसम्मर्द एव।

राधा – (साश्चर्यम्) कथं नु?

विशाखा – श्रुतम्, एकः सिद्धः ब्रह्मचारी आगतवान्।

राधा – अहो!

चित्रा – स तु परमतपस्वी वेदवेदांगनिष्णातः परमविरक्तश्च।

राधा – इदं तु महत्सौभाग्यं, भागवतास्तीर्थभूताः स्वयं।

ललिता – जना दर्शनाय गच्छन्ति।

राधा – अस्माभिः दर्शनीयः, किन्तु 'रिक्तपाणिर्न सेवेत राजानं देवतां गुरुम्', अतएव उपायनं गृहाण।

ललिता – स दुग्धाहारी एव।

राधा – अहो, धन्यमहो, तर्हि सितोत्पलामिश्रितं दुग्धं नवनीतञ्च गृहाण।

ललिता – यथाज्ञापयति।

यवनिकापातः

---

### तृतीयं दृश्यम्

(राधिकया सह सख्यो गह्वरवने श्रीकृष्णपार्श्वम् आगच्छन्ति। नेत्रे निमील्य मन्त्रजपे सक्तं तं निरीक्ष्याहुः।)

सख्यः – जयतु जयतु।

ललिता – हे भगवन्! प्रणमामि ललिता नाम्नी सखी राधायाः।

विशाखा – हे तपोधन! विशाखा नाम्नी अहं नमस्करोमि।

चित्रा – सखि! महात्मा तु नेत्रं न उन्मीलयति।

ललिता – भगवन्! अस्माकं सखी राधा अपि प्रणमति।

श्रीकृष्णः – (सस्मितं नेत्रमुन्मील्य) स्वस्ति।

ललिता – भगवन्! भवद्दर्शनेन कृतार्था वयम्।

विशाखा – श्रुतमस्माभिः यद् भवान् त्रिकालज्ञः ज्योतिषाचार्यः हस्तरेखायाः विद्वान् च। अस्माकं सख्या राधाया भाग्यं वदतु।

(राधा समीपं गत्वा हस्तं दर्शयति।)

श्रीकृष्णः – अहह, ईदृशी हस्तरेखा तु मया अद्यावधि न दृष्टा। प्रेमस्वरूपाया अस्या भाग्ये तु साक्षात् आनन्द एव। अस्या वशवर्ती आनन्दः।

ललिता – साधु, साधु। भगवन्! मम हस्तरेखामपि पश्यतु।

श्रीकृष्णः – अयि! त्वम् अवकाशोचिताचारसेवाप्रार्थन-भाषणे कुशला, सन्धिविग्रहिणी, प्रहेल्याज्ञातिकोविदा। परमप्रेष्ठसखीनामध्यक्षपदम् अलंकरोषि। पुष्पाणां मण्डने प्रवीणा त्वदीया ताम्बूलसेवा अतीव रोचते प्रियजनेभ्यः। त्वं सर्वदैव प्रियपात्रतां प्राप्स्यसि।

ललिता – (आत्मगतम्) एभिः तु सम्यक्तया चरित्रमुद्घाटितं मम। सिद्धता प्रमाणिता।

(प्रकाशम्) धन्यमहो। विशाखे! त्वमपि हस्तं दर्शय।

विशाखा – नूनमेव (हस्तं दर्शयति।)

श्रीकृष्णः – अयि! त्वं तु परिज्ञातार्थहृदया, उपाये पेशला, मन्त्रणायां सुदक्षा, पत्रभंगादिरचने तथा च माल्यापीडादिगुम्फने विचक्षणा भद्रा च। तव तु सर्वदैव भद्रं भविष्यति।

चित्रा – भगवन्! मम हस्तमपि पश्यतु।

श्रीकृष्णः – त्वं तु चित्रादिपूर्वकर्मसु निपुणा, नानादेशीयभाषिते काचभाजननिर्माणे, च पटुः, अथ च ज्योतिःशास्त्रे पशुव्रातविद्यायां स्वयमेव पण्डिता। किं मम परीक्षां करोषि।

चित्रा – मैवं भगवन्! भवान् तु सिद्धः।

(ततः मधुमंगलादयः सखायः प्रविशन्ति।)

मधुमंगलः – अयि वसुदामन्! अत्र तु बहवो जनाः, कोऽपि उत्सवः।

वसुदामा – अये! वृषभानुपुरे तु सर्वदैव उत्सवः, तदपि पृच्छामि।

मधुमंगलः – पश्य ललिताम्।

वसुदामा – बाढं (ललितासमीपं गत्वा) अयि ललिते! अत्र अद्य को महोत्सवः।

ललिता – (साश्चर्यम्) अये! वसुदामन्! मधुमंगल! श्रीदामन्! सुबल! यूयम् अत्र, अहो ज्ञातं यूयमपि दर्शनाय आगतवन्तः।

मधुमंगलः – (सविस्मयम्) कस्य दर्शनाय?

ललिता – अहो! अस्माकं वृषभानुपुरे एकः सिद्धो महापुरुष आगतः। स त्रिकालज्ञो भविष्यवेत्ता च। त्वमपि स्वहस्तरेखां दर्शय।

मधुमंगलः – (सकौतुकम्) अहं तु पादरेखां दर्शयिष्यामि।

ललिता – (साश्चर्यं) पादरेखा।

मधुमंगलः – अयि! वने वने एव भ्रमिष्यामि, कदाचित् स्थिरतामपि प्राप्स्यामि। श्रीदामन्! त्वं दर्शय।

श्रीदामा – (सकुतूहलम्) अहं तु उदररेखां दर्शयिष्यामि।

विशाखा – (साश्चर्यम्) उदररेखा।

श्रीदामा – उदरं कदा किमपि प्राप्स्यति?

मधुमंगलः – चलन्तु, सिद्धमहाराजस्य समीपमेव किमपि स्यात्?

ललिता – अवश्यमेव, सर्वप्रथमं साष्टांगं कुर्वात्।

मधुमंगलः – अयि! किम्?

ललिता – साष्टांगं न जानासि, साष्टांगं तु दण्डवत् इति कथ्यते।

मधुमंगलः – अयि! अहं तु जानामि केवलं साष्टांगयोगं दण्डमिमं च मम।

ललिता – (हसन्ती) अये भोजनभट्ट! साष्टांगप्रणामः स यो दण्डवत् भूमौ निपत्य क्रियते।

विशाखा – एते गुरुकल्पनीयाः। प्रणम्याः।

मधुमंगलः – (सगर्वम्) अहो, किं वदति, ब्रजवासी सर्वेषां गुरुः।

विशाखा – कथं नु खलु?

मधुमंगलः – (साभिमानम्) शृणु, जगतो गुरुः ब्राह्मणः, ब्राह्मणस्य गुरुः संन्यासी, संन्यासिनो गुरुः अविनाशी, अविनाशिनो गुरुः ब्रजवासी। ब्रजवासी सर्वपूज्यः।

वसुदामा – अये मधुमंगल! अस्या गुरुः अपि दर्शनीयः, चलामः।

(मधुमंगलादयः श्रीकृष्णसमीपं गच्छन्ति। तान् दृष्ट्वा सः आसनं परित्यज्य धावति। मधुमंगलादयो ललिताद्याश्च नृत्यन्ति।)

ललिता – (हसन्ती) अये मधुमंगल! श्रीदामन्! वसुदामन्! सुबल! कथं नृत्यन्ति?

मधुमंगलः – (सगर्वम्) अयि! प्रत्यक्षे किं प्रमाणम्? किं त्वया न दृष्टं ब्रजवासी सर्वेषां गुरुः। अस्मान् दृष्ट्वैव तव गुरुः पलायितः। किन्तु भवत्यः कथं नृत्यन्ति?

ललिता – (सगर्वम्) अनेन वेणुना।

मधुमंगलः – (साश्चर्यं) वेणुः, अयं तु अस्माकं वयस्यस्य।

ललिता – (सहासं) सः एव सिद्धगुरुः।

मधुमंगलः – (सव्यङ्ग्यम्) अहो, तर्हि तेन अत्र लीला रचिता।

वसुदामा – किं बहुना ?

श्रीदामा – अयि इमं वेणुं देहि।

ललिता – कथम् ?

सुबलः – तस्य वस्तु।

ललिता – तस्य वस्तु तस्मै प्रदातव्यम्।

मधुमंगलः – तस्य वयस्या वयम्।

ललिता – नूनमेव, किन्तु तेन छलं कृतम्, अतः यथाज्ञापयति मम अधीश्वरी, तथैव भविष्यति।

मधुमंगलः – अहो। का कथा ?

यवनिकापातः

---

## चतुर्थं दृश्यम्

(सखीभिः सह राधा विराजते। श्रीकृष्णेन सह मधुमंगलादयः सखायः प्रविशन्ति।)

मधुमंगलः – जयतु जयतु।

ललिता – स्वागतम् अभिनन्दनञ्च।

मधुमंगलः – कृतकृत्या वयं भवतीनां दर्शनेन, कृपया वेणुप्रदानेन अपि कृतार्थयन्तु।

श्रीदामा – वेणुं विना अधीरो अस्माकं वयस्यः।

ललिता – फलमिदं तु कपटस्य, कपटेन कुतः सुखम्।

मधुमंगलः – मैवं, स व्रजराजकुमारः।

विशाखा – कथमिदं कृतम् ?

श्रीकृष्णः – भामिनि! दर्शनार्थमेव लीला इयं कृता। एतदर्थं दण्डो यः स स्वीकर्तव्यो मया।

वसुदामा – अये वयस्य! किं कथयति, परिहासो भविष्यति।

मधुमंगलः – अहह, दैवस्य का कथा, दण्ड एव भोक्तव्यो न तु भोगः।

ललिता – किम् ?

मधुमंगलः – किमपि न, क्षुधार्तविप्रः किं कथयिष्यति।

(सख्यो राधया सह मन्त्रणां कुर्वन्ति।)

ललिता – दण्डो निर्धारितः।

मधुमंगलः – किम् ?

ललिता – यथा सिद्धस्वरूपं दर्शितं तथैव नटवररूपं दर्शयिष्यति, किन्तु सम्प्रत्येव न।

मधुमंगलः – तर्हि कदा ?

ललिता – होलिकोत्सवे, इदानीं तु।

सुबलः – इदानीम्।

ललिता – वेणुना सह अस्माकम् आतिथ्यं गृहाण।

मधुमंगलः –जयतु जयतु वृषभानुनन्दिनी।

श्रीदामा – जयतु जयतु नन्दनन्दनः।

वसुदामा – जयतु वृषभानुपुरम्।

सुबलः – जयतु सिद्धता लीला।

(सर्वे हसन्ति जयघोषं कुर्वन्ति च।)

(भरतवाक्यम्।)

**सिद्धलीला तु ध्यातव्या गोविन्दस्य श्रियेऽस्तु वः।**
**प्रेमरसप्रदायित्री सर्वचित्तानुरञ्जनी।।**

(निष्क्रान्ताः सर्वे।)

सिद्धतालीला समाप्ता

**– सह आचार्यः, वनस्थली विद्यापीठम्,**
**वनस्थली ( राज. )**

# भवानीभवनक्षत्रमाला

❑ डॉ. हरिसिंहराजपुरोहितः 'राजहरिः'

भक्तार्तिवृन्दाहरणक्षमायै
भ्रूभंगमात्राध्वरनाशकाय
सुभंगिमायै वरभंगिमाय
नमो भवान्यै च नमो भवाय।।१।।

भीतातिभीतातिसुखप्रदायै
संसारपाथोनिधितारणाय
भवप्रभायै भुवनेश्वराय
नमो भवान्यै च नमो भवाय।।२।।

दैत्यान्वयानाशभयंकरायै
विरूपरूपाक्षभयंकराय
अभीप्रदायै भवनाशनाय
नमो भवान्यै च नमो भवाय।।३।।

भुजंगिनीसुन्दरगामुकायै
भुजङ्गमालावलिवेष्टिताय
भुजंगवेण्यै भुजगेश्वराय
नमो भवान्यै च नमो भवाय।।४।।

वात्सल्यवर्षासरसेक्षणायै
सुरासुरार्चितांघ्रिसरोरुहाय
रसप्रियायै रसरूपकाय
नमो भवान्यै च नमो भवाय।।५।।

जगज्जनौघाघविनाशिकायै
जगज्जटाजालसुकर्तनाय
जगद्विधात्र्यै जगदीश्वराय
नमो भवान्यै च नमो भवाय।।६।।

मृगेन्द्रसंचारणदीक्षितायै
सुभ्रांगनन्दीश्वरवाहनाय
त्रिशूलहन्त्र्यै त्रयशूलहर्त्रे
नमो भवान्यै च नमो भवाय।।७।।

निलिम्पनाथार्चितविग्रहायै
निलिम्पसिन्धूद्धृतशेखराय
चन्द्राननायै धृतचन्द्रकाय
नमो भवान्यै च नमो भवाय।।८।।

मायापराशक्तिसमन्वितायै
नन्वर्द्धनारीश्वरनामकाय
शिवार्द्धजायै शिवशंकराय
नमो भवान्यै च नमो भवाय।।९।।

रक्ताभशाटीपटशोभितायै
गजाजिनाषाढसुशोभनाय
मनोरमायै मदनान्तकाय
नमो भवान्यै च नमो भवाय।।१०।।

हिरण्यलीलामृगलोचनायै
मृगांकमित्रानललोचनाय
त्रिलोचनायै हरिलोचानाय
नमो भवान्यै च नमो भवाय।।११।।

प्रचण्डदण्डाधृतचण्डिकायै
प्रचण्डचण्डाकृतिताण्डवाय
चण्डाननायै जटिलाननाय
नमो भवान्यै च नमो भवाय।।१२।।

वाराणसीनाथसमर्चितायै
गौरीगिरिस्थाद्रिसुतार्चिताय
भक्तार्चितायै जगदर्चिताय
नमो भवान्यै च नमो भवाय।।१३।।

चाम्पेयमालावलिभूषणायै
मन्दारमालावलिभूषिताय
सुमप्रियायै कुसुमप्रियाय
नमो भवान्यै च नमो भवाय।।१४।।

दुर्दान्तरक्षोमहिषान्तिकायै
भस्मान्धकानंगविनाशकाय
निशुम्भहन्त्र्यै त्रिपुरान्तकाय
नमो भवान्यै च नमो भवाय।।१५।।

क्षौमांचलाच्छन्नपयोधरायै
नभोदुकूलाम्बरधारकाय
रक्ताम्बरायैककुबम्बराय
नमो भवान्यै च नमो भवाय।।१६।।

संसारमायेतिसुकीर्तितायै
संसारमायापरिवर्जिताय
मायापरायै परमायिकाय
नमो भवान्यै च नमो भवाय।।१७।।

प्रसन्नदेवोत्त्थसेवितायै
लक्ष्मीशनेत्राब्जसुपूजिताय
रुद्रप्रियायै गिरिजाप्रियाय
नमो भवान्यै च नमो भवाय।।१८।।

अयाचितार्थप्रदकल्पवल्ल्यै
याच्यांधिकेष्टप्रसवप्रदाय
जगत्प्रकृत्यै प्रकृतेःपराय
नमो भवान्यै च नमो भवाय।।१९।।

समस्तलोकैकमनोहरायै
जटाटवीबद्धसरित्तटाय
भुजंगवेण्यै धृतपन्नगाय
नमो भवान्यै च नमो भवाय।।२०।।

हिमाद्रिवातानिलशीतलायै
प्रालेयकोपानलभीषणाय
कृपान्वितायै श्रुतिपारगाय
नमो भवान्यै च नमो भवाय।।२१।।

नवेतिसंख्यातसुविग्रहायै
दृष्टाष्टमूर्तिप्रतिरूपिताय
शिवार्चनायै सरलार्चनाय
नमो भवान्यै च नमो भवाय।।२२।।

सुकिंकिणीकाकलमेखलायै
डमड्डमन्नादविचक्षणाय
रोगापहायै क्षयनाशकाय
नमो भवान्यै च नमो भवाय।।२३।।

नीलाब्जकंठार्पितदोर्लतायै
गौरीगलावेष्टितबाहुकाय
चन्द्राननायै विधुशेखराय
नमो भवान्यै च नमो भवाय।।२४।।

अयाचितोपस्थितमानदायै
विनैव याच्यां सकलेष्टदाय
भूम्नाप्रदायै च भृशंप्रदाय
नमो भवान्यै च नमो भवाय।।२५।।

नामग्रहैरेव जगद्धितायै
हरेतिवाचैव विमोक्षणाय
मुक्तिप्रदायै भवमोक्षदाय
नमो भवान्यै च नमो भवाय।।२६।।

शिवप्रदायै जगदम्बिकायै
मयस्कराय प्रमथाधिपाय
कारुण्यमूर्त्यै करुणापराय
नमो भवान्यै च नमो भवाय।।२७।।

**- राजकीय-स्नातकोत्तरमहाविद्यालयः,**
**ओसियां ( जोधपुरम् )**

# तव कथामृतम्

❑ आचार्यः पं.नथमलशास्त्री दाधीचः

**सत्यधर्माय दृष्टये -**

**अथ** - द्वापरयुगे सत्यवतीनन्दनः पराशरात्मजो ज्ञानावतारो महामुनिर्भगवान् श्रीकृष्णद्वैपायनो वेदव्यासो ब्रह्मनद्याः सरस्वत्यास्तटे बदरीखण्डमण्डिते शम्याप्रासाश्रमे समाधिस्थे विराजमानोऽधर्मांशोद्भव-मनृतेनैधमानमसत्यहिंसोपद्रवकैतवकलहधर्मद्रोहद्वेष-दुराचारादिदोषनिधिं कलिं युगान्तरं विज्ञायैव लोककल्याणहेतवे कलिकृतदोषनिवृत्तिपूर्वकं धर्मादि-पुरुषार्थचतुष्टयसिद्धये, पुरा सृष्ट्यादौ श्रीमन्नारायणेन ब्रह्मणे प्रोक्तं सुप्रथितं '**चतुःश्लोकीभागवतम्**' विपुली कृत्य श्रीमद्भागवतमहापुराणं हरेर्लीलाकथामृतमय-मत्यद्भुतं शास्त्रं ससर्ज। अस्मद्राष्ट्रे पुराणशास्त्रमिदं लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णचन्द्रस्य प्रत्यक्षा वाङ्मयी मूर्तिरुच्यते, पूज्यते च सश्रद्धैर्भागवतधर्म-तत्त्वज्ञैः साधुभी रसिकैर्भावुकैर्भगवद्भक्तैर्नरनारिवृन्दैः श्रोतृभिः स्वाध्यायशीलैर्विद्वद्भिरिति। अस्यानुशीलनेन - '**भक्तिज्ञान-विरागासो विवेको वर्धते महानि**' **ति गीयते।** '**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्**' इति सिद्धान्तानुसारेणापि यथा शतसाहस्रीसंहिता - **भारतं पञ्चमो वेदः** कथ्यते - तथैवाष्टादशसाहस्रीपारमहंसी-संहिता **श्रीमद्भागवतमहापुराणमपि पञ्चमो वेद** एव विज्ञेयः।

पुराणेऽस्मिन् गोवृषभयोः (पृथिवीधर्मयोः) संवादे वर्णितमेवम् -

**प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः।**
**कलेर्दोषा इमे सर्वे सिंहशब्दाद् वृका इव॥**

(भा.मा.२/६२)

श्रीमद्भागवत - श्लोकमन्त्रध्वनिभिः सर्वे च ते दुर्दान्ताः सर्वसाधनबाधकाः कलिदोषाः सिंहशब्दाद् वृका इवेतस्ततः पलायन्ते विलीयन्ते च। अतएवोक्तम् - **क्षेमाय वै भागवतं प्रगर्जति।**

**धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां**
**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।**
**श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः**
**सद्योहृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥**

(भा. १/१/२)

वेदप्रणिहितधर्मसम्मतेऽस्मिन् महामुनिकृते महापुराणे श्लोके श्लोके पदे पदे निर्मत्सराणां सतां वेद्यं तापत्रयविनाशनं कैतवरहितं सर्वकल्याणकारकं शिवप्रदं वास्तविकं परमं धर्मतत्त्वं परब्रह्म सत्यं परिवर्णितमस्ति। यस्य च श्रद्धया नित्यस्वाध्यायेन श्रवणमात्रेण वा कथामृतपानमत्तानां कुशलकर्मणां सद्भक्तानां हृदि पुण्यश्रवणकीर्तनो भक्तवत्सलो भगवांस्तत्क्षणमेवा-वरुध्यते। अयमेव पुंसां परो लाभः। इतःपरं नास्ति किमपि प्राप्यं प्रियं वस्त्वस्मिन् सुरदुर्लभे मानुषे देहे जीवने वा।

**वृषभस्तु धर्मः** - वृषभरूपोऽयं धर्मश्चतुर्भिः पादैर्जगत्यां तिष्ठन् स्वधारणाशक्त्या लोकान् विधत्ते।

**तपः शौचं दया सत्यमिति पादाः कृते कृताः।**
**अधर्मांशैस्त्रयो भग्नाः स्मय-सङ्ग-मदैस्तव।।**

(भा. १/१७/२४)

युगेऽस्मिन् धर्मस्याद्यास्त्रयः पादास्त्वधर्मांशैर्द्यूतादि-दुर्व्यसनदुःसङ्गदुराचाररतैर्मदमत्तैर्भग्नाः केवलं सत्यात्मकेनैवैकेन पादेन धर्मो विलसति भारतभूम्यामिति। एतच्च सुविदितमेवास्ति यत्परम-सौभाग्यादशोकचक्राङ्कितमस्मद्राष्ट्रस्य ध्येयवाक्यं - **'सत्यमेव जयते'** दृढव्रतानां सत्यनिष्ठानां सत्पुरुषाणां वीराणां राष्ट्रभक्तानां धारणशक्तिमाश्रित्य शिरोमणिरिव सर्वेषां मूर्ध्नि विराजते। एवमेव - श्रीमद्भागवत-महापुराणस्य ध्येयवाक्यं - **'सत्यं परं धीमहि'** इत्यपि सिद्धान्तविरहितां छद्मधर्मनिरपेक्षतां न्यक्कृत्य सत्यधर्मसापेक्षतासिद्धिं प्रतिपादयत् राष्ट्रस्य जगद्गुरोर्गौरवं वितनोति विश्वस्मिन्विश्वे। द्वयोरेवैतयोर्ध्येयवाक्ययोर्भावात्मकतादात्म्येन ज्ञायते यज्जगत्यां व्यावहारिकसत्यस्याध्यात्मिकपरमसत्यस्य च रक्षणेनैव जनानामभ्युदयनिःश्रेयससिद्धिर्भवतीति प्रेरणास्पदं सत्यं तथ्यं हृदि सन्धार्यमिति धर्म्यं न्याय्यं हितवचनम्। द्वयोरेवोक्तध्येयवाक्ययोः शब्द- ब्रह्मणोऽपरिमिता शक्तिर्निगूढेत्यर्थो ज्ञेयः श्रेयसे प्रेयसे प्रबुद्धजनैः। **ब्रह्मेति परमात्मेति भगवानिति शब्द्यते** -

आद्योपान्तमस्मिन्धर्मशास्त्रे सर्वत्र सच्चिदानन्दमयं परं सत्यमेव गीयते व्याख्यायते च सर्वाश्रयः परं ब्रह्म परमात्मा भगवानिति। यथा - श्रीकृष्णावतारोपक्रमे गर्भस्तुत्यां देवाः सत्यं स्तुवन्ति -

**सत्यव्रतं सत्यपरं त्रिसत्यं**
**सत्यस्य योनिं निहितञ्च सत्ये।**
**सत्यस्य सत्यमृतसत्यनेत्रं**
**सत्यात्मकं त्वां शरणं प्रपन्नाः।।**

(भा. १०/२/२६)

त्रिकालाबाधितसत्यस्वरूपोऽयमेकः परमात्मैव सत्यस्योद्भावकः सत्यात्मकः सत्यनारायणः सत्यनेत्रेण सर्वद्रष्टा सत्ये हि सुप्रतिष्ठितः सर्वं जगद्रक्षति। **'सत्यं शिवं सुन्दरम्'** इदं परं सत्यमेव जगति परं सुन्दरं सुखदं सर्वकल्याणकरं शिवमिति कथ्यते। अस्मद्धर्मशास्त्रेषु बह्व्यः सत्यधर्मपरिचायकाः सारगर्भिताः सुविदिताः संस्कृतसूक्तयः सदैव स्मरणीयाः सन्ति। **'न हि सत्यात्परो धर्मः' 'सत्यधर्माय दृष्टये' 'धर्मः स नो यत्र न सत्यमस्ति' 'सत्यं न तद्यच्छलनानुविद्धम्'** इत्याद्याः। साम्प्रतिके धर्मनिरपेक्षता-परिप्रेक्ष्ये सत्यधर्मस्य रक्षणेनैव राष्ट्रे सर्वधर्मसमन्वयसिद्धान्तस्य पुष्टिर्भविष्यतीति विचिन्त्य सर्वैरेव सर्वधर्मसद्भावभावितसमाजस्य निर्माणकार्यं हि सामयिकं राष्ट्रसेवासत्कर्म मनसा वाचा कर्मणा संविधेयमित्ययं शास्त्रविधिः। **सत्यं शरणं गच्छामि। शुभमस्तु नित्यम्।**

**- अध्यक्षः,**
**अखिलभारतीयभागवतधर्मप्रचारपरिषदः,**
**छापर ( चूरू )**

# श्रीज्ञानवापीशिवः

❑ प्रो.ताराशंकरशर्मा पाण्डेयः

### शम्भोस्त्रिशूले स्थिता

गङ्गापावितचारुचन्द्ररुचिराद्यक्ष्मांशसंकाशिनी,
विद्योमापरिसेवमानपदिका व्योमास्पदानन्दिनी।
रक्षाभैरवनाथदृष्टिकलिता मातान्नपूर्णाभिधा,
काशीयं प्रभुविश्वनाथकृपया शम्भोस्त्रिशूले स्थिता।।1।।

### सोपानपंक्तिर्दृढा

कूपो यत्र विलोक्यते सुरचिता सोपानपंक्तिर्दृढा,
द्वारे तत्र हनूमतः सुरुचिरं वीरस्य सन्मन्दिरम्।
साम्मुख्ये प्रियभर्तृमूर्तिरमणा शृंगारगौरी स्थिता,
पाताले शिवलिंगरूपनियतः शम्भुः स्वयं राजते।।2।।

### जाग्रन्मना उत्थितः

ज्ञानं वारिमयं नवं शिवमयं शम्भो! स्वरूपं तव,
लीना ज्ञानजपे शिवा शिवमयी तज्ज्ञानवापी मता।
न्याय्योत्थानपले सुनीतिनिपुणैर्विश्वेश्वरो निश्चिते,
गौर्या ध्यानरतः समाधिनिरतो जाग्रन्मना उत्थितः।।3।।

(टिप्पणी-- ज्ञानवापीशब्दे -- 1.ज्ञानम् = जलं द्रवमयः शिवश्च। 2. शिवमयम्/ शिवमयी = मंगलमयं/यी, वेदमयं/यी वा।

### जागर्मि विश्वेश्वरः

अर्चाभून्मम वा न वा कथमपि शृंगारगौरी प्रिया,
तस्याः पूजनकर्म किन्तु सततं जायेत तस्माद्विधेः।
संकेतादहमद्य विक्लवतया जागर्मि विश्वेश्वरः।
पूजा नौ भवितावि! शम्भुशिवयोर्द्रक्ष्यन्ति सानातनाः।।4।।

### सा ज्ञानवापीरसा

यास्ते यावनमर्त्यलोकपिहिता देवाधिदेवाचला
प्राप्या न्यायपथानुसारिचरणा सा ज्ञानवापीरसा।
येनात्रैव निवासभूमिमुदितः कैलासवासाश्रयः
प्रीयेतां शिवकाशिवासरमणः ताराबलश्शंकरः।।5।।

### श्रीज्ञानवापीशिवः

जाग्रत्रस्मि चिरान्निधौ सुशयितो यज्ज्ञानवापीशिवो
वाक्कौलौ हरिविष्णुशंकरयुतौ तत्र द्विरूपो विधिः।
न्याय्याधीशमतिर्निदेशपरकः स्वश्चन्द्रचूडः परः
तैः प्रोत्थानपरोऽस्मि साधु जगती स्वस्था भवेद्भिन्दवः।।6।।

### कूटच्छदिर्भित्तिषु

काशीयावनमज्जितोदवसिते यज्ज्ञानवाप्या भुवि,
शुद्धान्वेषणकर्मदक्षपुरुषैः कूटच्छदिर्भित्तिषु।
हस्तिस्वस्तिकपुष्पचित्रवलितस्ताम्बूलपत्रादिको,
हिन्दूधर्मप्रतीकवस्तुनिकरस्स्तम्भेषु दृष्टो बहुः।।7।।

### गौरीबलः शंकरः

भित्तौ यत्कमलत्रिशूलडमरोरुट्टंकितालंकृतिर्-
घण्टीनागफणावृतिश्च लिखिता सिन्दूरलिप्तामराः।
वेशन्ते शिवलिंगरूपपरमः शम्भुः स्वयम्भूस्तथा,
प्राविर्भावमनाः स्वयं प्रकटितः गौरीबलः शंकरः।।8।।

### ज्ञानवापीनिमग्नः

स्नातो बुद्धः स्वयम्भूर्द्विदशपदमितो ज्ञानवापीतडागे,
मस्कित्वासौ महेशो मरकतमणिजो नन्दिसाक्ष्ये महेशः।
बुद्धायां पूर्णिमायां कलिप्रथमपदे सोमवारे शिवेशः,
प्रादुर्भूतोऽस्ति काश्यां क्षणकणकलितः
कालकालो कलेशः।।9।।

### नन्दिवक्त्राभिमुख्ये

काश्यां शृंगारगौरी कणकणकलिता पश्चिमे ज्ञानवाप्या,
पाथोऽन्तः कुण्डमध्ये विशदशिवशिवो नन्दिवक्त्राभिमुख्ये।
त्र्यक्षो वो नोऽक्षिसाक्षी चलपटलपटं कारितो न्यायदक्षैर्-
हर्षोत्कर्षेण फुल्लाः सहृदयमणयः शर्व नृत्यन्ति भक्ताः।।10।

इति राष्ट्रपतिसम्मानित - प्रतिनवबाणभट्ट -
पं.श्रीमोहनलालशर्मपाण्डेयात्मजेन प्रोफेसरपदभाजा
डॉ. ताराशंकरशर्मपाण्डेयेन प्रणीतं
'श्रीज्ञानवापीशिवदशकं' पूर्णम्।

- सेवानिवृत्तः आचार्य एवं
साहित्यविभागाध्यक्षः,जगद्गुरुरामानन्दाचार्य राजस्थान
संस्कृतविश्वविद्यालयः, जयपुर (राजस्थानम्)

# भारतानां भूः

❑ अमरदत्तशर्मा:

भरतभुवो गायन्ति गौरवं स्वर्निवासिनो निर्जरा:
प्रीत्या पूरयति जगदेषा भरतानां विश्वम्भरा
भारतभूमिरियं भरतानामितरमहीनां महीयसी
देवा वस्तुमिहेच्छन्तीयं स्वर्गादिव गरीयसी
देवत्वं ह्यपवर्गं स्वर्गं दिशतीयं च वसुन्धरा।
भरत .........

प्रत्यूषे विकिरति पूर्वाशा स्वर्णरेणुमयसिन्दूरम्
जगत्तमो हर्तुं प्रवहति प्रभाकरस्यातपपूरम्
विदधति ब्रह्माध्वरं ब्राह्मणाः देवानामर्चनापरा।
भरत .........

भानोर्भूषयति प्रथमांशुस्तिलकेन हिमगिरिमालम्
जलाशये विकसति करसंगान्मुकुलितजलजानां जालम्
गुञ्जन्ति मधुरं मधुमत्ताः कमलोपरि मधुने भ्रमरा:।
भरत .........

पङ्कं प्रक्षालयति जाह्नवी सुधासमानं तत्रीरम्
तेऽखेलन् रामादिभ्रातरः सरयूनद्या ह्यच्छतीरम्
वृन्दाविपिन-निकुञ्जेऽद्यापि श्रूयन्ते मुरली स्वरा:।
भरत .........

अत्रैवास्ति धरित्रीस्वर्गः कश्मीरः शारदाप्रदेशः
केसर-कुसुम-लता-फल-तरुभिः
कृतः प्रकृत्यानन्दनवेशः
देवदेव्य इव चारुदर्शनाः नार्यः सन्ति तथा नराः।
भरत .........

हर्यवतारैस्तीर्थैः सद्भिः भूमिरियं वर्तते पुनीता
मनुजोऽत्रत्यै संयच्छति सा कर्मयोगशुभज्ञानं गीता
सत्याचारवतां प्राज्ञानां प्रज्ञा चास्ति ऋतम्भरा।
भरत .........

निज एवायं ममेतिभावैः पूर्णोऽयं भरतानां देशः
आत्मवदाचरति सर्वैः सह परतावा नहि किंचिल्लेशः
परम्परा चैतेषामेषा कुटुम्बवन्निखिला धरा।
भरत .........

- पचेवर, टोंक
मो. 9460593822

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या – **2139101912498**
**IFS Code - CNRB0002139**

# सम्पत्कुमारसम्भवम्

❑ डॉ. के. मल्लिका

**उपोद्घातः**

संस्कृतवाङ्मये मुख्यतमेषु महाकाव्येषु मुख्यतमं स्थानं वहति महाकवेः कालिदासस्य कुमारसम्भव-काव्यम्। तदनन्तरकालेऽपि रचितानां काव्यानां मार्गदर्शकानि पञ्चकाव्यानि इति वक्तुं शक्यते। महाकवेः कालिदासस्य कुमारसम्भवकाव्यमनुसृत्य १९४५ तमे वर्षे पार्थिवनाम संवत्सरे 'सम्पत्कुमारसम्भवकाव्यम्' विरचितवन्तः शिरसिनहल् कृष्णमाचार्याः।

**ग्रन्थकर्तुः परिचयः-**

शिरशिन्हल् कृष्णमाचार्याः क्रोधिनामसंवत्सरे श्रावणशुक्लद्वितीया शनिवासरे पुनर्वसु नक्षत्रे तृतीये चरणे कर्काटकसङ्क्रमणे १३-८-१९०५ तमे वर्षे सञ्जाताः।[१] एते षोडशवर्षवयसि एव कवितालेखनम् आरब्धवन्तः। तैः कृतः प्रथमग्रन्थः **'मनोजविजय-भाणः'**।

कृष्णमाचार्याः शतावधानसार्वभौमाः।[२] कृष्णमाचार्याः 'नैजां राष्ट्रस्य आद्यशतावधानीति' अन्वर्थ बिरुदेन सम्मानिताः। ते बहून् ग्रन्थान् रचितवन्तः।[३] क्रमशः **'पद्मावतीपरिणयः'**, **'रुक्मिणीकल्याणम्'**, **'गरुडगर्वापहरमणम्'**, **'गीतातत्त्वमीमांसा'**, **'शतविधबन्धशतकम्'**। तथैव कालिदासस्य काव्यत्रयमनुसृत्य **'मनः सन्देशकाव्यम्'**, **'गुरुवंशमहाकाव्यम्'**, **'सम्पत्कुमारसम्भवकाव्यम्'** इत्यादीनि। तेषु कृष्णमाचार्येण विरचितं सम्पत्कुमारसम्भव'चरितमिति काव्यलक्षणोपेतं सहृदयाह्लादकारकं काव्यम् वर्तते।

**सम्पत्कुमारसम्भवकाव्यकथा -**

काव्येऽस्मिन् कथा चतुःसर्गेषु वर्णिता। तत्र प्रथमे सर्गे ६५ श्लोकाः सन्ति। द्वितीय सर्गे ६६ श्लोकाः सन्ति। तृतीये सर्गे ६८ श्लोकाः सन्ति। चतुर्थे सर्गे ७४ श्लोकाः सन्ति। आहत्य २७३ श्लोकेषु सम्पत्कुमारसम्भव-काव्यस्य वृत्तान्तं लिखितम्।

११०८-११४२ क्री.श. तमे वर्षे आदिशेषाव-तारभूताः रामानुजाचार्याः कन्नडदेशो भिट्टिदेवो नाम विट्ठलदेवराजस्य पुत्रकस्य पिशाचबाधां दूरीकृत्य शिष्यभूतस्य तस्य राज्ञः **विष्णुवर्धन** इति नामकरणं कृतवन्तः। तस्मिन् समये एकस्मिन् दिने ऊर्ध्वपुण्ड्रधारणार्थं श्वेतमृत्तिकायाः अलभ्यत्वात् विचारावस्थायाम् आसन्। तस्मिन् समये रामानुजाचार्याणां स्वप्ने प्रत्यक्षीभूत्वा श्रीमन्नारायणः 'भो यतीन्द्र! यादवाचले श्वेतमृत्तिका वर्तते। मम निवासोऽपि तत्रैव। अतः मां तत्रैव सम्प्रतिष्ठाप्य आलयनिर्माणं कुरु' इति उक्तवान् आदेशितवान् च। प्रातःकाले उत्थाय एतत् वृत्तान्तं विष्णुवर्धनाय निवेदितवन्तः रामानुजाचार्याः। राजपरिवारैस्सह तिरुनारायणपुरं गन्तुम् उद्युक्तवन्तः। मध्ये अध्वरम् अरण्यप्रान्तं सज्जीकृत्य सम्यक् मार्गनिर्माणं कुर्वन्तः यादवाद्रिं गतवन्तः।

तत्र वेदपुष्करिणीती दत्तात्रेयमहर्षिणां काषायत्रिदण्डधारणेन पवित्रभूतायाः शिलायाः[४] नमस्कारं कृतवन्तः। पुष्करिण्यां स्नात्वा रामानुजाचार्याः अपि

नूतनकाषायत्रिदण्डानि स्वीकृतवन्तः। ततः यादवशिखरं गतवन्तः। तदानीं यतीन्द्राणां स्वप्ने प्रत्यक्षीभूतः श्रीमन्नारायण अवोचत्, 'भो लक्ष्मणार्य! अस्य पर्वतस्य दक्षिणदिशि कल्याणतीर्थस्य पार्श्वे पुष्पवनं विद्यते।' तस्य उत्तरदिशि वल्मीकमेकं विद्यते। तत्रैव मम वासः। तस्य तीर्थस्य उत्तरे भागे पर्वतस्य अधः पुरा गरुत्मता आनीता श्वेतमृत्तिका विद्यते। श्वेतद्वीपात् आनीता श्वेतमृत्तिका अक्षया। शीघ्रं स्वीकुरु इति'। तदानीं लक्ष्मणाचार्याः सन्तोषेण शीघ्रमुत्थाय राजानम् एतद् वृत्तान्तं निवेदितवन्तः। राजाज्ञया तत्र सर्वम् अन्वेषणं कृत्वा वल्मीकं दृष्टवन्तः।

तदानीं रामानुजाचार्याः त्रिदण्डेन खननं कृत्वा रामप्रियः इति तिरुनारायणस्वामिनं यादवाद्रीशं ज्ञातवन्तः। तस्मिन् दिने पुष्यशुद्धचतुर्दशी गुरुवासरे पुनर्वसुनक्षत्रम् च। दिव्यवाद्यवेदघोषैः रामानुजाचार्याः रामप्रियस्य क्षीराभिषेकं कृत्वा त्रीणि दिनानि पूजितवन्तः। ततः कल्याणसरसः उत्तरदिशि त्रिदण्डेन खननं कृत्वा श्वेतमृत्तिकां स्वीकृत्य ऊर्ध्वपुण्ड्रधारणं कृतवन्तः। ततः रामानुजाचार्याः अरण्यं सर्वं दूरीकृत्वा तिरुनारायणस्वामिनः एकम् अद्भुतम् आलयं निर्मापितवन्तः। विविधवर्णाः तत्र स्थिरनिवासं कृतवन्तः। तस्य ग्रामस्य **तिरुनारायणपुरमिति** नामकरणं कृतवन्तः रामानुजाचार्याः। तस्मिन् क्षेत्रे श्रीरङ्गराजभट्टर् इति वैष्णवम् अर्चकरूपेण नियुक्तवन्तः। सम्प्रोक्षणादीनि कृत्वा पक्ष-मास-संवत्सरोत्सवानां सञ्चालनाय उत्सवविग्रहार्थं विचारं कृतवन्तः।

एवं प्रकारेण तं देवालयं श्रीपाञ्चरात्रविधानेन सञ्चालयितुं नियमविधानं कृत्वा उत्सवविग्रहाय परितापसन्दर्भे पुनः स्वप्ने तिरुनारायणः प्रत्यक्षीभूतस्सन् अवोचत्, हे लक्ष्मणार्य! रामप्रियेति प्रसिद्धिं मम उत्सवविग्रहं दिल्लीचक्रवर्तिनः अधीने विद्यते अतः तत्र गत्वा ताम् उत्सवमूर्तिम् आनयेति आदिदेश। एतद् विषयं विष्णुवर्धनाय विनिवेद्य रामप्रियमानेतुं विविधपरिवारैः दिल्लीनगरं गतवन्तः रामानुजाचार्याः।

रामानुजाचार्याणाम् आगमनवार्तां श्रुत्वा दिल्लीचक्रवर्ती चकितोभूत्वा, विविधमन्त्रिभिः समालोच्य रामानुजवैभवं ज्ञात्वा, 'एते महानुभावाः समरार्थं नागच्छन्ति। परन्तु कारणं किमिति न ज्ञायते। अतः प्रथमं तत् ज्ञातव्यम्' इति निश्चित्य, पण्डितरायः भगवन्तरायः इति अमात्यद्वयं यतिराजसन्निधिं प्रति प्रेषितवान्। तौ द्वावपि रामानुजयतिसार्वभौमानां दर्शनं कृत्वा, नमस्कृत्य अपृच्छतां यत् स्वामिनः! भवताम् आगमनस्य कारणं किमिति न जानीमः, कृपया उच्यताम् इति विज्ञापितवन्तः। तच्छ्रुत्वा चिरुमन्दस्मितवदनारविन्दाः रामानुजयतिसार्वभौमाः अवोचन् यत् भवतां प्रभुः सत्पुरुषः इति अस्माभिः श्रुतः। एकवारं तं द्रष्टुम् आगताः वयम् इति।

अमात्यैः द्वारा तां वार्तां श्रुत्वा सन्तुष्टो दिल्ली चक्रवर्ती सपरिवारं रामानुजाचार्याणां स्वागतसत्काराणि कृत्वा राजभवने पूजितवान्। यतिसार्वभौमं दृष्ट्वा अन्तःपुरे किं चिन्तयन्तीति आचार्यसूक्तिमुक्ता-वल्यां नम्बूरुकेशवाचार्यैः उक्तं यत्

**सीसम्**" -

**इतडटे मुनु राचयिन्ति बूनिन ब्रह्म**

**राक्षसोत्तमुनकु मोक्षप्रदात!**

**इतडटे यल वेङ्कटेश्वरुनकु मुनु**
**शङ्खचक्रमुलुच्चु सद्गुरुण्डु!**
**इतडटे मुनु कूर्मपतिनि ब्रतिचीन**
**मुखुनिगाध्रिप्पिन मुनिवरुण्डु!**
**इतडटे मुनु भष्य मिम्पोन्द रचियिञ्चि**
**भरतिमेप्पिञ्चु भव्यमूर्ति!**
**इतडटे रङ्गनाधुनकिष्टमन्त्रि!**
**इतनिदलचिन समकूरुनिहपरम्बु-**
**लनि परस्पर मनुकोनि रतिव लनुचु**
**वादि भीकरगुरुडने मोद मरल!**

**उपर्युक्तस्य भावस्तु**

पुरा राजपुत्रिकायाः ब्रह्मराक्षसात् रक्षणं कृतवन्तः एते यतिसार्वभौमाः एव। श्रीवेङ्कटेश्वराय शङ्खचक्रप्रदाता एते एव। कूर्मनाथस्य पश्चिमदिशि प्रतिष्ठापकाः एते एव। **श्रीभाष्यं** विरच्य भारतीदेव्या सम्मानिताः एते एव। श्रीरङ्गनाथस्य अभीष्टप्रदायकाः एते एव। एतेषां स्मरणेनैव इहपरसिद्धिर्भवति इति अभिभाषितवन्तः।

ततः दिल्लीशः यतिराजसार्वभौमान् प्रणम्य, आर्य 'दासोऽयं श्रीमतां सन्तोषं कथं करिष्यामि' इति अपृच्छत्, तदानीं रामानुजाचार्याः एवमुक्तवन्तः - रामप्रियो नाम तिरुनारायणस्वामिनः उत्सवविग्रहं भवतां निकटे विद्यते इति ज्ञातम्। तदर्थम् आगतवान् अहम् इति। तदानीं दिल्लीश्वरः स्वस्याधीने विद्यमानानि विग्रहाणि सर्वाणि प्रदर्शितवान्। परन्तु तत्र रामप्रियस्य उत्सवविग्रहं न दृष्टम्। तदानीं रामानुजाचार्याः अस्माकं दैवमूर्तिः रामप्रियः अत्र न दृश्यते। भवतां निकटे अन्यानि विग्रहाणि सन्ति वा इति पृष्टवन्तः। तच्छ्रुत्वा दिल्लीश्वरः एवमुक्तवान्-भवतां रामप्रियः भवद्भिः आहूतश्चेत्, झटिति आगमिष्यति खलु। किमर्थं नागच्छति इति। तच्छ्रुत्वा रामानुजाचार्याः मौनेन स्थिताः। ततः यतीन्द्राणां स्वप्ने प्रत्यक्षीभूतः रामप्रियः हे रामानुजयतीन्द्र! दिल्लीश्वरस्य पुत्री **बीबी नाञ्चारी** माम् अन्तःपुरे स्वप्रणयवाहिन्याम् आनन्दयति। अतः तत्र द्रष्टुं शक्नोति इत्युक्त्वा अदृश्यो बभूव।

प्रातः उत्थाय रामानुजाचार्याः स्वप्नवृत्तान्तं सर्वं स्मृत्वा, स्नानानुष्ठानादीनामनन्तरं सपरिवारं द्विगुणीकृतोत्साहेन दिल्लीश्वरं समीप्य, कस्तूरीतिलकोज्ज्वलं पीताम्बरधारिणं रामप्रियं सन्दर्शितवन्तः। रामप्रियस्य अनुग्रहं प्राप्तवती **बीबी नाञ्चारी** रामप्रियं त्यक्तुं न संसिद्धा। तदानीं दिल्लीशः एवमुक्तवान्- 'भो यतिसार्वभौम! रामप्रियः भवतां सन्निहितः एव खलु! यदि आगच्छति चेत् स्वीकृत्य गच्छन्तु' इत्युक्तवान्। रामप्रियस्य विग्रहं न सञ्चरति अतः पुत्र्याः बीबी नाञ्चार्याः निकटे एव स्थास्यतीति दिल्लीश्वरस्य अभिप्रायः।

परन्तु, यतिसार्वभौमैः हस्ताभ्यां प्रसारेण यदा आह्वानवचनानि उक्तानि झटिति सुन्दरागमनेन नाट्यं कुर्वन् रामप्रियः आगत्य, रामानुजाचार्याणां अङ्केस्थितः। तदानीं रामप्रियम् आलिङ्गनं कृत्वा यतिसार्वभौमाः आनन्दोत्साहेन हा सम्पत्कुमार! आगतोवा इति आनन्दं प्रकटितवन्तः। तदद्भुतं दृश्यं दृष्ट्वा, रामप्रियं! 'यतिराजपुत्रः, सम्पत्कुमारः' इति च व्यवहृतवन्तः। ततः दिल्लीप्रदेशात् सम्पत्कुमारेण सह यादवाचलं प्रत्यागताः

यतिसार्वभौमा: ।

विरहाकुलस्वान्ता **बादुषापुत्री** बीबी नाम्नारी रामप्रियस्य वियोगं सोढुम् अशक्ता विलपति। तद्विषयं दिल्लीशाय निवेदितवन्त: अन्त:पुरजना: । आगतं जनकं दृष्ट्वा एवमुक्तवती बीबी नाम्नारी- 'हे पित: ! यदुगिरिनाथ: मम मनोनाथ: । तस्याभावे मम जीवितं निरर्थकम् । अत: मम प्राणत्यागात् गत्यन्तरं नास्ति' इति। झटिति दिल्लीश: रामानुजयतिसार्वभौमाणां सन्निधिं प्राप्य आत्मजाया: बीबी नाम्नार्या: वृत्तान्तं निवेदितवान् । 'मया आनीतं सम्पत्कुमारं कथं दास्यामि ?' इत्युक्तवन्त: रामानुजाचार्या: । तदानीं सर्वै: अमात्यै: समालोच्य, दिल्लीश: विविधकनकवस्तुवाहनैस्सह पुत्रीं बीबी नाम्नारीं यदुगिरिं प्रेषितवान् ।

यादवाद्रौ शस्त्रोक्तरीत्या सम्पत्कुमारं सम्प्रतिष्ठाप्य विविधोत्सवान् सञ्चालितवन्त: यतिसार्वभौमा: । सम्पत्कुमारे बीबी नाम्नार्या: ऐक्यत्वात् बीबीनाम्नार्या: अर्चाविग्रहमपि सम्पत्कुमारस्य पादपद्मयो: प्रतिष्ठापितवन्त: रामानुजयतिसार्वभौमा: । सम्पत्कुमारस्य उत्सवेषु **'वैरमुडिसेवा'** अत्यन्तं मुख्यतमो भवति। दिल्लीशेन सम्पत्कुमाराय समर्पितानि स्वर्णाभरणादीनि, समलंकृत्य संशोभते सम्पत्कुमार इतीयं कथा सम्पत्कुमारसम्भवकाव्यकथा ।

**उपसंहार: -**

यतिवर्याणां रामानुजाचार्याणां परमवैभवम् अपि च कथं सम्पत्कुमारस्य आविर्भाव: जात: इति 'सम्पत्कुमारसम्भवम्' इति तेलुगु-तिगलारि भाषयो: विद्यमानतालपत्रात् अनूदित: अयं ग्रन्थ: ।

इत्थम् कालिदासविरचितकुमारसम्भवच्छाया-माश्रित्य विदुषा कृष्णमाचार्येण विरचितमिदं काव्यम् सर्वलक्षणसमन्वयोपेतं सहृदयाह्लादकं च राराजते ।

**टिप्पणी -**

१. मातृका २ पुष्पिका भागे

२. मातृका २ पुष्पिका भागे उपलभ्यमानं तथ्यमिदम्

३. ग्रन्थस्यान्ते सर्गस्यान्ते उल्लेखितं यथा -

४. प्रस्तरखण्डा: (शिलाया:) पाषाणं

५. सम्पत्कुमारं प्रथमसर्गे १० श्लोके

६. सम्पत्कुमारं प्रथमसर्गे १६ श्लोके

७. मातृका ७ पुष्पिका भागे उपलभ्यमानं तथ्यमिदम्

---

**उपर्युक्तग्रन्थसूची**


१. भार्गव उपपुराणे महायोगि माहात्म्यम्

२. दिव्यसूरिचरितम्-गरुडवाहन पण्डित:, विद्यातरङ्गिणी प्रेस्, मैसूर्-१८८५

३. प्रापन्नामृतम्-अनन्ताचार्या: -लक्ष्मीवेङ्कटेश्वरा प्रेस्, मुम्बै

४. दिव्यसूरिवैभवम्-जग्गु-वेङ्कटाचार्या:

५. दिव्यसूरिकथामृतम्-प्रतिवादिभयङ्कर-मनङ्गाचार्या:

६. उपदेशरत्नमालाया: संस्कृतानुवाद:-अभिरामवर:


---

- राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

# त्वां कथं विस्मरेयम्

❑ महेशनारायणशर्मा

जातमासीद्यदा जीवनं वै भृशं,
नीरसं निन्दितं सर्वतो मामकम्।
त्वं रसं वर्षयन्ती तदा जीवने,
ह्यागता त्वां कथं विस्मरेयं प्रिये।।

प्रेमबीजं तदा हृद्रसायां हि मे,
क्षिप्तमासीत्ततः प्राक् कयापीह नो।
नेत्रसीरेण चोप्तं त्वया बीजकं,
ब्रूहि तद्विस्मरेयं कथं हे प्रिये!।।

ओष्ठयोस्ते च धृत्वाधरौ मामकौ,
त्वं चिरं चुम्बिता प्राङ्मया नैकधा।
साधुनापीह चित्ते स्मृती राजते,
ब्रूहि तद्विस्मरेयं कथं हे प्रिये!।।

वाटिकायां सृतौ वीथिकायान्तथा,
चापणे मित्रगेहे च प्रेक्षालये।
आवयोर्निर्भरं मोददं सङ्गमं,
ब्रूहि तद्विस्मरेयं कथं हे प्रिये!।।

आपगायास्तटे ते जलोच्छालनं,
शाययित्वा च क्रोडे मुदा चुम्बनम्।
पाणिना केशराशेर्मृदुस्पर्शनं,
ब्रूहि तद्विस्मरेयं कथं हे प्रिये!।।

आवयोरेकदा नीलवर्णेन वै,
नाम ते हस्तपद्मे लिखित्वा नवम्।
हर्षितासीर्भृशं प्राक् स्मरेस्साम्प्रतं,
ब्रूहि तद्विस्मरेयं कथं हे प्रिये!।।

दूरभाषेण सम्भाषितं प्राक् चिरं,
सर्वदा रम्यरम्यं कृतं भाषणम्।
नाधुना त्वं कथं भाषसे किन्तु मां,
ब्रूहि किं पातकं मे कृतं हे प्रिये!।।

साम्प्रतं तेऽस्ति वाञ्छा भृशं मे प्रिये!,
त्वन्तथापीह मां नैव सम्भाषसे।
एकलोऽहं विना त्वामहो! सर्वतो,
बुध्यतां मूल्यकं प्रेमजं मामकम्।।

- संस्कृताध्यापकः
नानेर, टोंक ( राजस्थानम् )
9828874601

# महाभारतस्य विकासो विस्तारो वा

❑ डॉ. रमेशचन्द्रबुनकरः

वस्तुतो महाभारतस्य कथा मूलतः संक्षिप्ता एवासीत्। सेयं कथा क्रमशो विकसिता भूत्वा अन्ते च 'शतसाहस्त्री संहिता' रूपेण वर्तमानकाले समागता। सेयं रचना एकेनैव जनेन एकस्मिन् काले एव न कृता अपितु कालक्रमेण महाभारतस्य विस्तारो जातः।

महाभारतस्य विकासः क्रमशः त्रिषु रूपेष्वभवत्।

(1) जयः (2) भारतम् (3) महाभारतम्

एतेषु त्रिषु रूपेषु विविधानामुद्देश्यानां सम्पूर्तये अस्य पृथक्-पृथगवसरेषु विकासोऽभूत्। अत्रास्य विवरणं प्रस्तूयते -

**(1) जयः** - महाभारतस्य मूलरूपं जयनाम्ना प्रसिद्धमासीत्। जयस्यार्थः महाभारतमिति। महाभारतमिदमितिहासो वर्तते।

अग्रे उच्यते - '**जय नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा**' महाभारतस्यास्य मङ्गलश्लोके नारायणं नरं सरस्वतीं च नमस्कृत्य जयनामको ग्रन्थः रचितोऽभूत् इति निर्दिश्यते -

**नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।**[1]

ग्रन्थस्यास्य रचना वेदव्यासेन कौरवपाण्डवानां विजयवृत्तमाधारं मत्वा कृताऽभूत्। वेदव्यासः उभयेषाम् कौरवपाण्डवानां समकालीन आसीत्। उभयेषामपि सजीववर्णनं कृतम् तस्माद् जयोऽयमितिहासग्रन्थः। महाभारतविकासात् परमिदमपि इतिहासत्वेन परिगण्यते। वर्तमानमहाभारतस्य आदिपर्वणः 35 तमे अध्याये 'जय' ग्रन्थस्य वर्णितविषयस्यारम्भो भवति। ग्रन्थेऽस्मिन् क्षत्रियाणां वर्णनं वर्तते। ग्रन्थेऽस्मिन् वेदव्यासः 8800 श्लोकान् रचयामास। आदिपर्वणः अनुक्रमणिकापर्वणि प्रथमाध्यायस्य 81 तमे श्लोके -

**अष्टौ श्लोकसहस्त्राणि अष्टौ श्लोकशतानि च।**
**अहं वेद्मि शुको वेत्ति संजयो वेत्ति वा न वा।।**[2]

वेदव्यासः अमुं ग्रन्थं वैशम्पायनं श्रावयामास अत्र अधर्मोपरि धर्मस्य विजयो वर्णितः। धर्मचर्चा एवास्य मौलिभूतं प्रयोजनम्। वेदव्यासस्य पञ्च शिष्याः आसन् -

(i) जैमिनिः (ii) पैलः (iii) वैशम्पायनः (iv) सुमन्तुः (v) शुकश्चेति।

अस्य जयमहाकाव्यस्य पृथक्-पृथक् नैकानि संस्करणानि आसन्। जैमिनिः अश्वमेधपर्व रचयामास। वैशम्पायनो भारतसंहितां रचयामास। अश्वमेधपर्वणि युधिष्ठिरकृत - अश्वमेधयज्ञस्य वर्णनं क्रियते।

**भारतम्** - द्वितीयावस्थायां जयस्य विस्तारः भारतरूपेणाऽभवत्। अत्र 24000 श्लोकाः सन्ति। ग्रन्थेऽस्मिन् उपाख्यानानां मेलनं नास्ति। आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमेऽध्याये - द्व्यशीतितमे श्लोके

कथ्यते -

**चतुर्विंशतिसाहस्त्रीं चक्रे भारतसंहिताम्।**
**उपाख्यानै विना तावद् भारतं प्रोच्यते बुधैः।।**[3]

एतदनन्तरं वेदव्यासः उपाख्यानभागं विहाय 24,000 श्लोकपुरस्सरं भारतसंहिता इति नामधेयं ग्रन्थरत्नं चकार। भारतमिति नाम्नाऽयं ग्रन्थः समादृतः वर्तते।

वस्तुतो भारतस्य प्रवचनम् उपदेशश्च वैशम्पायनो जनमेजयस्य नागयज्ञावसरे कृतवान्। नागयज्ञसमये वेदव्यासोऽपि उपस्थित आसीत्। तदा जनमेजयः वेदव्यासं निवेदयामास यत् जयमहाकाव्यममुं श्रोतुम् इच्छा मे बलवती अस्ति। तदा वेदव्यासः वैशम्पायनाय आदेशं दत्तवान् यत् जयनामकं महाकाव्यं सः अन्यान् श्रावयेत्। वैशम्पायनः कथावर्णनम् अकरोत्। कौरवपाण्डवानां युद्धवृत्तान्त-वर्णनेन युद्धकथाश्रवण-प्रसङ्गे जनमेजयः नैकान् प्रश्नान् अकरोत् येषां प्रश्नानां यथेष्टमुत्तरं वैशम्पायनो दत्तवान्। 'जय'नाम्नि महाकाव्ये एतेन संवादेन एव भारतनामधेयस्य ग्रन्थस्य निर्माणं समजनि। सम्भवतो ग्रन्थोऽयं महाभारतस्यादिपर्वणः 61 तम अध्यायात् प्रारभ्यते यत्र उक्तकथाश्रवणस्य वृत्तं वर्णितमस्ति। एतस्य भरतसंज्ञाया अपि किमपि कारणं वर्तते। अत्र भरतवंशीयराज्ञां वर्णनं वर्तते। कौरवपाण्डवयोः युद्धवर्णनमत्र निहितमस्ति। वृत्तमिदं केवलं युद्धविजयेषु एव नास्ति सीमितम् प्रत्युत तत्सम्बद्धा अनेका भिन्ना घटनाः अपि प्रस्तुताः सन्ति।

**महाभारतम्** -

अन्तिमावस्थायां महाभारतस्याभिनवं संस्करणं प्राकाश्यमगात्। अस्मिन्नेव रूपे अद्यायं ग्रन्थ उपलब्धो वर्तते। भारतनामको ग्रन्थः महाभारतरूपेण परिणेतुम-वसरः नैमिषारण्यनामके पवित्रस्थानेऽभूत्। प्रदेशोऽयं सम्प्रति उत्तरप्रदेशस्य सीतापुरजनपदस्य स्थाने वर्तते। नैमिषारण्यस्थाने कस्मिंश्चित् यज्ञे शौनकादयः ऋषयः अनुष्ठानं विधाय महाभारतस्य सम्पादनम् अकुर्वन्। द्वादश-वार्षिकमिदं सत्रमासीत्। अस्य प्रवक्ता सौति ऋषिः आसीत्। यः वैशम्पायनात् श्रुत्वा पर्याप्तं परिवर्धनं विधाय शौनकादीन् ऋषीन् श्रावयामास। द्वादशवर्षाणां सुदीर्घे काले सौतिः स्वश्रोतॄणां जिज्ञासाशमनाय समाधानानि समाचरितवान्। फलतः सुदीर्घेऽस्मिन् ग्रन्थे कौरवपाण्डवानां पूर्णम् इतिवृत्तं मूलकथानकरूपे आसीत्। नैकैः संवादकारणैः धर्म-अध्यात्म-इतिहास-भूगोल-आख्यान-नीतिशास्त्र-आचार-विचारादीनां समस्तानां सांस्कृतिकविषयाणां समावेशो भूत्वा नैके विषयाः अत्र प्रस्तुतीकृताः। भारतस्यायं विश्वकोशः। विशालता महत्ता चास्य मूले आसीत्। तस्मादुच्यते -

**महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते।**[4]

**1. महाभारतस्य महत्त्वम्**

महाभारतसदृशस्य विशालकायग्रन्थस्य विश्वसमाजे कियन्महत्त्वमिति वक्तुं तु वयमक्षमाः। इदमस्माकं वर्तते किमप्यनितरसाधारणं वैशिष्ट्यभ्राजमानं शोभमानं ग्रन्थरत्नम्। अस्य महत्त्वं तु सर्वैरप्यङ्गीक्रियते मुक्तकण्ठेन। 'महत्त्वाद् गौरवाच्च महाभारतं कथ्यते' इति न्यायेन ग्रन्थस्यास्य महत्त्वं स्वत एव सिद्धिमाप्नोतीति।

आदिपर्वणः प्रथमेऽध्यायेऽस्य महत्त्वम् उररीक्रियते – तद्यथा –

**द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा।**
**सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम्।।**
**तस्याख्यानवरिष्ठस्य विचित्रपदपर्वणः।**
**सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च।।**
**भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम्।**
**संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम्।।**
**जनमेजयस्य यां राज्ञो वैशम्पायन उक्तवान्।**
**यथावत् स ऋषिस्तुष्ट्वा सत्रे द्वैपायनाज्ञया।।**
**वेदैश्चतुर्भिः संयुक्तां व्यासस्याद्भुतकर्मणः।**
**संहितां श्रोतुमिच्छामः पुण्यां पापभयापहाम्।।**[5]

आख्यानेषु यत् सर्वश्रेष्ठं, विचित्रशब्द-विन्यासपरिपोषितोऽयं ग्रन्थः। चतुर्णां वेदानां सारभूततत्त्वमत्रोपदिष्टं भगवता व्यासेन। आत्म-परमात्मनोः सूक्ष्म-स्वरूपमत्र चित्रितम्। परमात्मनः किमपि विशिष्टं तत्त्वमत्र व्यनक्ति महर्षिर्व्यासः। भारत-देशस्य गौरवमयमितिहासं प्रकटयन्तीयं कथा अस्मान् सर्वान् भारत-नागरिकसभ्यान् स्वप्रवाहमयीभाषया पुनातीति नास्ति संशीतिलेशः।

महाभारतस्येयं कथा त्रिष्वपि लोकेषु महद् ज्ञानमित्यस्मिन् रूपे प्रतिष्ठामेति। नैकैः काव्यशास्त्र-तत्त्वरहस्यैः इदं महाभारतं सुशोभतेतमां विश्वपटले। अनुष्टुप्-इन्द्रवज्राप्रभृतिभिः वृत्तैः, वैदिकलौकिकाभ्यां संकेताभ्यां ग्रन्थोऽयं राराजते विदुषां समवाये। यथोच्यते महाभारतकारेण महर्षिणा वेदव्यासेन –

**अलंकृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः।**
**छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम्।।**[6]

महर्षिः वेदव्यासः सृष्टेः सर्वाणि रहस्यानि, योगशास्त्रं, धर्माऽर्थकामादीन्, विविधानि शास्त्राणि, लोकयात्राविधानमित्यादीनां निखिलानामपि वस्तु-जातानामत्र सुष्ठुरीत्या वर्णनमकारि।

समेषामपि वेदानां रहस्यमितिहासश्च समेऽपि विषया अत्र विशेषेण व्याख्यातास्सन्ति।

तद्यथा –

**इतिहासाः सवैयाख्या विविधाः श्रुतयोऽपि च।**
**इह सर्वमनुक्रान्तमुक्तं ग्रन्थस्य लक्षणम्।।**

स्वकीयब्रह्मचर्येण, तपसा च सनातनवेदानां व्यासं विधाय लोकपावनमिदं महाभारतं महर्षिः वेदव्यासः चक्रे।

सम्प्रति ग्रन्थस्यास्य **वैशिष्ट्यं विस्तरेण** प्रतिपाद्यते –

ब्रह्मन् वेदरहस्यं च यच्चान्यत् स्थापितं मया।
साङ्गोपनिषदां चैव वेदानां विस्तरक्रिया।।
इतिहासपुराणानामन्येषां निर्मितं च यत्।
भूतं भव्यं भविष्यं च त्रिविधं कालसंज्ञितम्।।
जरामृत्युभयव्याधिभावाभावविनिश्चयः।
विविधस्य च धर्मस्य ह्याश्रमाणां च लक्षणम्।।
चातुर्वर्ण्यविधानं च पुराणानां च कृत्स्नशः।
तपसो ब्रह्मचर्यस्य पृथिव्याश्चन्द्रसूर्ययोः।।
ग्रहनक्षत्रताराणां प्रमाणं च युगैः सह।
ऋचो यजूंषि सामानि वेदाध्यात्मं तथैव च।।

न्यायशिक्षाचिकित्सा च दानं पाशुपतं तथा।
हेतुनैव समं जन्म दिव्यमानुषसंज्ञितम्।।
तीर्थानां चैव पुण्यानां देशानां चैव कीर्तनम्।
नदीनां पर्वतानां च वनानां सागरस्य च।।
पुराणानां चैव दिव्यानां कल्पानां युद्धकौशलम्।
वाक्यजातिविशेषाच्च लोकयात्राक्रमश्च यः।।
**यच्चापि सर्वगं वस्तु तच्चैव प्रतिपादितम्।**
**परं न लेखकः कश्चिदेतस्य भुवि विद्यते।।**[7]
अज्ञानतिमिरान्धस्य लोकस्य तु विचेष्टतः।
ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकम्।।
धर्मार्थकाममोक्षार्थैः समासव्यासकीर्तनैः।
तथा भारतसूर्येण नृणां विनिहतं तमः।।
पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणां च कृतमेतत् प्रकाशनम्।।
इतिहासप्रदीपेन मोहावरणघातिना।
लोकगर्भगृहं कृत्स्नं यथावत् सम्प्रकाशितम्।।
संग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान्।
सम्भवस्कन्धविस्तारः सभारण्यविटङ्कवान्।।
अरणीपर्वरूपाढ्यो विराटोद्योगसारवान्।
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान्।।
कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगन्धिभिः।
स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः।।
अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः।
मौसलः श्रुतिसंक्षेपः शिष्टद्विजनिषेवितः।।
**सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति।**
**पर्जन्य इव भूतानामक्षयो भारतद्रुमः।।**[8]

एवं प्रकारेण महाभारते आदिपर्वणि उल्लिखितेषु वर्णनेषु महत्त्वं प्रतिपादितम्।

**- अध्यापकः, ( रा. उ. मा. वि. देवलिया**
**निवास - ग्राम पीथावास हाथोज,**
**वाया झोटवाडा ), जयपुरम्-302012**
**मो. 8003555711**

1- महाभारतस्य आदिपर्वणि प्रथमाध्याये प्रथमश्लोकः।
2 - आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमाऽध्याये, श्लोकसंख्या-82
3 - आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमाऽध्याये, श्लोकसंख्या-102
4 - आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमाऽध्याये, श्लोकसंख्या-274
5 - आदिपर्वणि - श्लोकसंख्या - 17-21
6 - तत्रैव - 28
7 - आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमाऽध्याये, श्लोकसंख्या-62-70
8 - आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमाऽध्याये, श्लोकसंख्या-84-92

पुस्तक-समीक्षा

# अन्योक्तिदर्पणः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

सुप्रथितस्य कविसार्वभौमस्य राष्ट्रपतिसम्मानितस्य विविधसम्मानोपाधिविभूषितस्य पद्मालङ्करणेन सभाजितस्य संस्कृतविश्वविद्यालयकुलपतिपदमलङ्कृतवतः प्रो.अभिराजराजेन्द्रमिश्रस्य बहुसंख्याकाः काव्यकृतयः प्रकाशमाप्ता इति सुभृशं वेत्ति संस्कृतजगत्। तस्य काव्यकृतिषु यानि प्रकाशनानि सपद्येव नूतनतया समवतीर्णानि तेषु 'अन्योक्तिदर्पण' नामकः कृतिसङ्ग्रहो विशेषतयोल्लेखनीयः। अन्योक्तिविधा संस्कृतसाहित्ये समुल्लेखनीयमितिहासं बिभर्ति। स्वयं प्रो.अभिराजराजेन्द्रमिश्रेण संस्कृतसाहित्ये अन्योक्तिसाहित्यमवलम्ब्य शोधकार्यं कृतमासीत्। सुप्रथितस्तस्य ग्रन्थः **'संस्कृतसाहित्य में अन्योक्ति'**। संस्कृते विपुलमस्ति राजेन्द्रमिश्रवर्यस्य स्वकीयमन्योक्तिसाहित्यम्। एवंविधेषु काव्यसङ्ग्रहेषु चतुर्थः सङ्ग्रहोऽस्ति 'अन्योक्तिदर्पणः' सः सपद्येव प्रकाशमाप्तः।

विविधेषु छन्दःसु विविधानाधारानादाय विविधाभिः शैलीभिर्गुम्फिता अन्योक्तयः सङ्कलिताः सन्त्यस्मिन् सङ्ग्रहे। अष्टसु विभागेषु विभाजितास्वन्योक्तिषु विविधान् देवानादाय विलिखिता अन्योक्तयः प्रथमे विभागे सन्ति यासु शम्भुः, विष्णुः, शनिः, गणपतिः इत्यादयो देवाः सम्मिलिताः सन्ति। द्वितीये मानवसम्बद्धे भागे पान्थं, मालाकारं, कविं, सौगन्धिकं, पुंश्चलीम् अन्यांश्चादाय निबद्धाःसन्त्यन्योक्तयः। तृतीये प्रकृतिवर्गे चन्द्रं, सूर्यं, मेघं, नदीम् एवंविधानुद्दिश्य सङ्कलिता अन्योक्तयः। एवमेव चतुर्थे अश्व-मृग-मर्कटप्रभृतयः पशवः परिगृहीताः, पञ्चमे राजहंस-मयूर-काक-कोकिल प्रभृतयः पक्षिणः, षष्ठे दर्दुर-मत्स्य-कच्छपादयो जीवाः, सप्तमे च पारिजातखर्जूर-निम्ब-चन्दनद्रुम-तुलसी-शमी प्रभृतयो वृक्षाः समुद्दिष्टाः। अन्तिमेऽष्टमे वर्गे दीपक-कपाट-दूर्वा-लवण-लेखनीप्रभृतयः प्रकीर्णाः पदार्थाः परिगृहीताः।

अन्योक्तिष्वेतासु संस्कृतस्य, लोकभाषाणां चाऽपि छन्दांसि द्रष्टुं शक्यन्ते प्रवाहमयी सुललिता च शैली समवलोकनीया या कविवर्यस्य परिचायिनी विद्यते। यथा **भ्रमरान्योक्तौ** दोहाच्छन्दोबद्धं पद्यमिदमस्ति -

**'महनीयं ननु तत्कृते यच्च यदीयं कर्म।**
**भृङ्ग एव जानात्यहो सुमासवानां मर्म।।165।।**

तथैव **चम्पकान्योक्तौ** देशभाषागतं 'बरवै' छन्दः परिगृहीतमस्ति। नवयुगस्योपकरणान्यादाय 'नलजनो' परि याऽन्योक्तिर्निबद्धा सा सोरठाच्छन्दसि विलसति-

**'कूपाः शुष्काः सन्ति, नो तज्जलमिह पीयते।**
**सम्प्रति नला लसन्ति सिकतापानकदायिनः।।242।।**

इत्थमन्योक्तिसङ्ग्रहेऽस्मिन् 244 अन्योक्तयो द्रष्टुं शक्यन्ते। सङ्ग्रहस्यास्य सम्पादनं कविप्रवरस्यास्य 'शिष्येण' विद्वद्वर्येण प्रो.अनिलप्रतापगिरिमहोदयेन कृतमस्ति। गुरु-शिष्ययोर्वृत्तमप्यस्मिन् ग्रन्थे हृदयावर्जनशैल्याऽऽबद्धं समास्वाद्येत पाठकैः। डॉ.अनिलप्रतापगिरिः (आचार्यपदे नियुक्तः) प्रयागीय - विश्वविद्यालयस्य स्नातकोऽस्ति यत्राऽऽचार्यपदमलङ्कृतवान् प्रो.अभिराजराजेन्द्रमिश्रः किन्तु यथैव सत्रमारब्धं, प्रो.मिश्रो हिमाचलीयविश्वविद्यालये आचार्यपदमारुह्य गतः। तथापि मिश्रवर्याणां गुरुत्वस्य तादृशी प्रेरणा गिरिवर्येण परिगृहीता यत् स आत्मानं मिश्रवर्याणां शिष्यमभिदधाति, मिश्रवर्यश्च तमात्मन 'एकलव्यं' समाचष्टे। तदिदं ग्रन्थस्य भूमिकायां

द्रष्टुं शक्यते यत्र 'नान्दीवाक्' प्रो.मिश्रस्य मुद्रिता, सम्पादकीयं च डॉ.अनिलप्रतापगिरिवर्यस्यास्ति यस्मिन् प्राञ्जलसंस्कृतशैल्यां कविपरिचयस्तस्यैव, अन्योक्ति-साहित्यस्येतिहासोऽपि सारगर्भितशैल्या निबद्धः प्रमोदयेत् पाठकान्।

कविसार्वभौमस्य मिश्रवर्यस्य नूतनोऽयं रचनासङ्ग्रहः संस्कृतजगति सप्रश्रयं सम्मानयिष्यते इत्यत्र नाऽस्ति सन्देहः।

अन्योक्तिदर्पणः कविः कविसार्वभौमः मिश्रोऽभिराजराजेन्द्रः, सम्पादकः - प्रो.डॉ.अनिल-प्रतापगिरिः, प्रकाशकः - वैजयन्त प्रकाशन इलाहाबाद, पृ.सं. 68, मू. 300/-

## शोधपत्रिका स्वरमङ्गला

राजस्थान-संस्कृत-अकादम्या मुखपत्रिका स्वरमङ्गला 46 वर्षेभ्यो निरन्तरं प्रकाश्यते इति जानीयुरेव संस्कृतसेविनः। अस्यां पत्रिकायां विविधविषयिण्यो रचनाः प्रकाश्यन्ते स्म, देशस्य प्रतिष्ठितानां लेखकानां कृतयः स्थानमस्यां लभन्ते स्म। नूतनं वृत्तमिदं विज्ञाय प्रसीदेयुः पाठका यत् साम्प्रतमियं पत्रिका शोधपत्रिकारूपेण मान्यतां प्राप्य भाषाद्वये शोधलेखान् प्रकटयति। पत्रिकाया अस्याः सम्पादनभारो **भारती पत्रिकासम्पादकेन डॉ.श्रीकृष्णशर्मणैव** स्वीकृतोऽस्ति। शोधपत्रिकारूपेण मान्यताप्राप्तये यासामपेक्षाणां पूर्तिरावश्यकी साऽनया गते कालखण्डे विहिताऽभूत्।

शोधपत्रिकायाः स्तरस्य सुदृढीकरणार्थमेका **विद्वत्समीक्षासमितिरावश्यकी**। साऽनया संघटिताऽस्ति। शोधविदुषां विदुषीणां च दशकमस्याः समितेः सदस्यतां बिभर्ति। गतेषु वर्षेष्वस्या शोधपत्रिकाया विषयविशेष-मधिकृत्य प्रकाशिता विशेषाङ्काः प्रकाशमायाता इति सन्तोषास्पदम्। महात्मगान्धिनः 150 तमजयन्त्या उपलक्ष्ये 45 तम वर्षस्य तृतीयोऽङ्को **गान्धीविशेषाङ्क**रूपेण प्रकाशितोऽभूत् यस्मिन् गान्धीसिद्धान्तानामपि चर्चाऽभूत्, संस्कृतसाहित्ये गान्धिनो विमर्शविषयिण्यपि चर्चाऽभूत्। सर्वलेखाः संस्कृते अभूवन्, कविसार्वभौमस्य प्रो.अभिराजराजेन्द्रमिश्रस्य रचना **गान्धिगीतं** हिन्दीभावार्थसहितममुद्रय। वर्षेष्वेषु भारते स्वतन्त्रताया अमृतमहोत्सव आयोज्यते, अतः 46 तम वर्षस्यैकः संयुक्ताङ्कः **संस्कृतशिक्षक विशेषाङ्क**रूपेण प्राकाश्यत यस्मिन् भारते शिक्षाया वैशिष्ट्यं विमृष्टं, संस्कृतशिक्षकाणां स्वातन्त्र्यसंघर्षे योगदानविषयक एको लेखो हिन्द्यां प्रकाशितः (डॉ.राधावल्लभत्रिपाठिनः), राष्ट्रचेतनाविषयकोऽन्योऽपि लेखो हिन्द्यां प्रकाशितः, अपरो लेखः संस्कृते हिन्द्यनुवादसहितः प्रकाशितः। अन्ये लेखाः संस्कृतेऽभवन्।

एतदनन्तरं मूल्यवतः शोधस्य सामग्रीं प्रदातुं **'भारतस्य प्राचीनं ज्ञानविज्ञानं'** परिचाययितुं विशेषाङ्कस्यैकस्य प्रथमे भागे आयुर्विज्ञानं, विमानविज्ञानं, अष्टाङ्गयोगं, ऊर्जाविज्ञानम् इत्यादयो विषया हिन्द्यां, संस्कृते च परिशीलिताः। एतस्यापरो भागोऽपि प्रकाश्येत यथाऽवसरम्। इत्थं शोधपत्रिकारूपेण नवीने कलेवरे प्रकटीकृतायाः स्वरमङ्गलायाः स्वागतं संस्कृतशोधार्थिभिः कृतमिति सन्तोषस्य विषयः।

स्वरमङ्गला (त्रैमासिकी शोधपत्रिका), प्रधानसम्पादकः - दिनेशकुमारयादवः (प्रशासको राजस्थान संस्कृत अकादम्याः), प्रबन्धसम्पादकः- सञ्जय झाला (निदेशकः अकादम्याः), **सम्पादकः - आचार्यः डॉ.श्रीकृष्णशर्मा**, प्रकाशिका - राजस्थानसंस्कृत-अकादमी, झालानाडूंगरी, जयपुरम्, वार्षिकं मूल्यम् - 100/-, आजीवन मूल्यम् 1000/-

# पदप्रहेलिका - 1

❑ मधुसूदनशर्मा ( प्राध्यापकः )

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 | 2 | 3 | ■ | 4 | 5 | | | ■ |
| ■ | 6 | | | | | ■ | ■ | 7 |
| 8 | | | ■ | | ■ | 9 | 10 | |
| ■ | | ■ | 11 | | ■ | 12 | | |
| 13 | ■ | 14 | | ■ | 15 | ■ | ■ | |
| 16 | | | ■ | 17 | | 18 | 19 | |
| | ■ | 20 | 21 | | ■ | 22 | | ■ |
| ■ | 23 | | | ■ | ■ | | ■ | 24 |
| 25 | | | ■ | ■ | 26 | | | |

**वामतः दक्षिणम् -**

1. वाणी, सरस्वती (3)
2. नरके विद्यमाना नदी (4)
6. कमलम्, सरोजम् (5)
8. भाग्यम्, नियतिः (3)
9. इन्द्रः, पुरन्दरः (विसर्गरहितः) (3)
11. युधिष्ठिरभीमार्जुनानां माता (2)
12. अकस्मात् (3)
14. जलम्, अम्बु (2)
16. अन्तिमः (विसर्गरहितः) (3)
17. आरोग्यम्, रोगाभावः (5)
20. क्षत्रियः, राजपुत्रः (3)
22. नमनम्, नम्रता (2)
23. भूमिः, वसुधा (3)
25. भुवनम्, लोकः, पृथ्वी (3)
26. 'दन्तानां राजा' इत्यस्य विग्रहवाक्यस्य समस्तपदम् (4)

**उपरिष्टात् अधः -**

2. पाकशाला, महानसम् (4)
3. तटम्, कूलम् (3)
4. ध्वजः, पताका, भगवतः विष्णोः माला (4)
5. तद्-शब्दस्य पुंलिङ्गे द्वितीयैकवचनरूपम् (2)
7. समाप्तिः, विरामः (5)
9. वस्त्रम्, गृहम् (विसर्गरहितः) (2)
10. साकम्, सार्धम् (2)
11. घटः, कलशः (2)
13. अर्थी, भिक्षुकः (3)
14. इन्द्रस्य नगरी, सुरपुरी (5)
15. ऋते, अन्तरेण (2)
17. अपरः, इतरः (2)
18. कामदेवः, मनोजः (विसर्गरहितः) (4)
19. संन्यासी, छन्दःशास्त्रानुसारम् उच्चारणसमये विश्रामस्थानम् (2)
21. जन्म, उत्पत्तिः (2)
23. पर्वतः, नगः, वृक्षः (विसर्गरहितः) (2)
24. प्रियः, प्रेमी (2)

**पदप्रहेलिकायाः पूरणाय अवधातव्याः अंशाः -**

- लेखितव्य-पदस्य लेखनाय अपेक्षितखण्डानां संख्या कोष्ठके लिखिता अस्ति। निर्दिष्टसंख्याकेषु खण्डेषु एव तत् पदं लेखनीयम्।
- एकस्मिन् खण्डे एकः एव वर्णः लेख्यः। स्वतन्त्रः स्वरः, व्यञ्जनसहितः स्वरः वा वर्णः ज्ञेयः। कस्माच्चित् वर्णात् पूर्वं स्थितः स्वररहितः व्यञ्जनवर्णः तेन सह एव समानखण्डे लेखितव्यः। यथा-

| स | र | स्व | ती |
|---|---|---|---|

| अ | ङ्कः |
|---|---|

- पदान्ते स्थितः व्यञ्जनवर्णः तु भिन्नखण्डे एव लेखनीयः। यथा-

| मु | ख | म् |
|---|---|---|

| ज | ग | त् |
|---|---|---|

प्रहेलिकां पूरयित्वा sanskritbharti09@gmail.com इत्यत्र प्रेष्यताम्। समीचीनोत्तरं प्रेषितवतां नामानि अग्रिमे अङ्के प्रकाशयिष्यन्ते।

नारी-स्तम्भः

# तुष्टिर्दुहिता मे भवेत्

❑ डॉ. राजेश्वरी भट्ट

भारतीयपरिवारेषु कन्याजन्म युगयुगेभ्यो दुःखस्य मूलं चिन्तायाः कारणञ्च मन्यते। भवतु आढ्यो-दरिद्रो, ग्राम्यो नागरीयो नारी-पुरुषो वा कन्याजन्म केनापि नाभिनन्द्यते।

कथितञ्च - जातेति कन्या महती हि चिन्ता।

अन्यच्च -

धिक् खल्वलघुशीलानामुच्छ्रितानां यशस्विनाम्।
नराणां मृदुसत्त्वानां कुले कन्याप्ररोहणम्।
महा./उद्योगपर्व/भगवद्यानपर्व
97 अध्याय 15 श्लोक

पूर्वजानां कटुवनुभवजन्यानि वचनानीमानि शिलालिखितमिव अनुसरद्भिर्भारतीयैः कन्याजन्म अभिशाप इव गण्यते। कन्याजन्मनः भयात् केचित् राक्षसाः प्रसूतिगृहे एव नवजातां नाशयन्ति। अन्ये बहवो नृशंसा लिङ्गपरीक्षणमाध्यमेन कन्याभ्रूण-हत्यासदृशं महत्पापं कुर्वन्तो मनागपि न विचलन्ति। परलोकदर्शनभयान्मुक्ता केचित्क्रूराः सद्योजातां सुकुमारीं कन्यां वनेषु निर्जनेषु च स्थानेषु नीत्वा तत्रैव क्षिपन्ति। एतद्विपर्यये अस्माकं भूमौ पुत्रस्य प्राप्तिर्महत्पुण्यानां फलमिव सौभाग्यदायिनी मन्यते। 'पुत्रः पुं नाम नरकात् त्रायते' अतः पुत्रस्य प्राप्त्यर्थं दम्पती यज्ञ-तप-दानव्रतादीनामायोजनं कुरुतः। दृश्यते यत् मंगलकार्येषु, पावनपर्वसु, उत्सवेष्वन्य-समारोहेषु च समाजस्य परिवारस्य वरिष्ठजनाः प्रणमन्तीं नववधूं गर्भवतीं महिलाञ्च 'पुत्रवती भव', 'वीरप्रसविनी भव' इति आशिषं व्याहरन्तो लोके पुत्रस्य महिमानं वर्धयन्ति कृतार्थाश्च भवन्ति।

परं नैतदस्माकं सांस्कृतिकं तथ्यं यतोहि महा-भारते आदिपर्वणि 'ममेयं परमा तुष्टिर्दुहिता मे भवेद् यदि' महर्षिवेदव्यासस्य देवीगान्धार्यै कृतेयं कल्याणकारी कामना लोके कन्यामहिमवर्धिका, देव्या गान्धार्या उदारदृष्टेः परिचायिका अभिनन्दनीया च वर्तते। महाभारतग्रन्थेन ज्ञायते यत् कदाचित् लोककल्याणार्थं लोके विचरन् महर्षिर्वेदव्यासोऽ-ध्वश्रमेण परिश्रान्तो धृतराष्ट्रप्रासादमगच्छत्। तत्र देव्या गान्धार्याः कृते अभीष्टं वरं प्रदातुमैच्छत्। निःसन्ताना गांधारी महर्षिं व्यासम् आत्मनः कृते शतपुत्रानयाचत। कालेन व्यासस्य वरदानेन गान्धारी गर्भवती जाता। किन्तु द्विवर्षानन्तरमपि तस्याः प्रसवकालो नागतः। अस्मिन्नन्तरे पाण्डुपत्नी कुन्ती पुत्रजन्मना धन्यतरा जाता। तप्तलौहसमं दाहकं समाचारमिमं श्रुत्वा दुःखेन चेष्टमाना गांधारी स्वोदरं घातयामास, यस्माद् लौहपिण्डेन समं कर्कश एको मांसपिण्डः प्रादुर्भूतो जातः। इदमप्रत्याशितं भयङ्करं दृश्यं दृष्ट्वा गांधारी झटिति तम् मांसपिण्डमुत्स्रष्टु-मुद्यताऽभवत् तदैव महर्षिर्व्यासस्तत्रागत्य गांधारीं क्रूरकर्मणोऽस्माद् न्यवारयत्। ततो देवीं गांधारीं समाश्वासयन् आत्मना प्रदत्तस्य वरदानस्य सार्थकतां

प्रतिपादयन् महर्षिर्व्यासो गान्धार्या उदरात् प्रादुर्भूतस्य मांसपिण्डस्य शतभागान् कृत्वा तद्वर्धनाय द्विवर्षावधिपर्यन्तं घृतपूर्णेषु कुम्भेषु स्थापयामास। अस्यां प्रक्रियायाम् एकाधिकं शतभागा अजायन्त। ततो देवी गान्धारी पुत्र्याः स्नेहसंयोगं ध्यायन्ती अचिन्तयत्, नूनमहं व्यासस्य वरदानेन शतपुत्राणां जननी भविष्यामि किन्तु यदि मम एका पुत्री भवेत् तर्हि मे परमा तुष्टिर्भविष्यति। आजीवनं आत्मनाऽऽचरितानां सत्य-तप-दान-व्रत-हवना-दीनां सत्कर्मणां फलरूपेण गान्धारी व्यासं एकस्याः पुत्र्याः प्राप्त्यर्थं याचनामकरोत् अकथयच्च –

यदि सत्यं तपस्तप्तं दत्तं वाप्यथवा हुतम्।
गुरवस्तोषिता वापि तथास्तु दुहिता मम।।
महा./आदि/सम्भव पर्व/115 अ, 14 श्लोक

गान्धार्याः मनोरथं विज्ञाय महर्षिर्वेदव्यासो गान्धार्याः कृते एकस्याः सुभगायाः कन्यायाः प्राप्त्यै वरदानमयच्छत् यस्माद् दौहित्रयोगोऽपि भविष्यति। कथितञ्च - पूर्वं पुत्रशतं त्वेतन्न मिथ्या वागुदाहृता। दौहित्रयोगाय भाग एकः शिष्टः शतात् एष ते सुभगा कन्या भविष्यति यथेप्सिता।। महाभारत/आदिपर्व/सम्भवपर्व/115 अ. 16 श्लोक

इदमुक्त्वा महर्षिव्यासो घृतकुम्भे शतात् परं शिष्टं भागं निहितवान् यस्मात् सुन्दरी मनोऽनुसारिणी कन्या दुःशला जाता। महाभारतग्रन्थे प्राप्ता गान्धार्याः कामना लोके कन्याकीर्तिकलयित्री, अपवादस्वरूपा च वर्तते।

## हिन्दी अनुवाद

भारतीय परिवारों में कन्या का जन्म युगयुगों से दुःख का मूल एवं चिन्ता का कारण समझा जाता है। सम्पन्न अथवा दरिद्र, शिक्षित हों अथवा अशिक्षित, नारी हो अथवा पुरुष कन्या का जन्म किसी के भी द्वारा अभिनन्दनीय नहीं है। कहा भी गया है –

कन्या का जन्म महती चिन्ता का कारण है तथा अत्यन्त शीलसम्पन्न, स्वाभिमान से युक्त यशस्वी एवं सत्वगुण सम्पन्न परिवार में कन्या का जन्म दुःख का कारण है।

पूर्वजों के कटु अनुभवजन्य इन वचनों को शिलालिखित के समान अनुसरण करने वाले भारतीय कन्या के जन्म को अभिशाप के समान हैं। कन्या जन्म होने पर कुछ राक्षस प्रसूतिगृह में ही नवजात कन्या को नष्ट कर देते हैं अथवा नष्ट करवा देते हैं। अन्य बहुत से लोग लिङ्ग परीक्षण के माध्यम से कन्याभ्रूण सदृश महान् पाप करने में तनिक भी विचलित नहीं होते हैं। परलोकदर्शन के भयसे मुक्त कुछ क्रूर व्यक्ति सद्यो जाता सुकुमारी कन्या को वन अथवा निर्जन प्रदेश में ले जाकर वहीं फेंक आते हैं। इसके विपरीत भारत-भूमि में पुत्र की प्राप्ति महान् पुण्य के फल के समान मंगलदायिनी मानी जाती है' अतः पुत्र की प्राप्ति के लिए पतिपत्नी यज्ञ-तप-दान व्रतादि का आयोजन करते हैं।' प्रायः मंगल कार्यों में, पवित्र पर्व पर, उत्सवों में अथवा अन्य समारोहों में समाज एवं परिवार के वरिष्ठजन प्रणाम करने वाली नववधू को अथवा गर्भवती महिला को 'पुत्रवती भव' तथा

'वीरप्रसविनी भव' इत्यादि आशीर्वादात्मक वचनों से लोक में पुत्र की महिमा मण्डित करते हैं। तथा कृतार्थ होते हैं।

इतने पर भी वास्तव में यह हमारी सांस्कृतिक सत्यदृष्टि है, क्योंकि महाभारत के 'आदिपर्व' में '**यदि मुझे पुत्री होगी तो मुझे परम संतोष होगा**' महारानी गान्धारी द्वारा महर्षि वेदव्यास से की गई पुत्री की याचना, लोक में कन्या की महिमा को बढ़ाने वाली एवं देवी गांधारी की उदार दृष्टि की परिचायिका एवं अभिनन्दनीय है 'महाभारत ग्रन्थ' से ज्ञात होता है कि कदाचित् लोक कल्याण की दृष्टि से विचरण करते हुए महर्षि वेदव्यास मार्ग में चलने के श्रम से थककर धृतराष्ट्र के महल में पहुँचे। वहाँ गान्धारी के द्वारा की गई सुव्यवस्था से सन्तुष्ट महर्षि वेदव्यास ने गांधारी को मनचाहा वरदान देने की अभिलाषा व्यक्त की। निःसन्तान गान्धारी ने वेदव्यास से अपने लिए सौ पुत्रों का वरदान माँगा। समय से गान्धारी गर्भवती हुई, किन्तु दो वर्ष व्यतीत होने पर भी उसका प्रसवकाल नहीं आया। इसी बीच पाण्डु की पत्नी कुन्ती पुत्र जन्म से धन्य हुई। तप्त लोहे के समान दाहक इस समाचार को सुनकर दुःख से छटपटाती हुई गांधारी ने अपने पेट पर प्रहार किया जिसमें से लौहपिण्ड के समान कठोर एक मांस पिण्ड प्रकट हुआ। इस अप्रत्याशित एवं भयङ्कर दृश्य को देखकर गांधारी झट से उस मांसपिण्ड को फेंकने के लिए उद्यत हो गई। उसी समय महर्षि वेद व्यास वहाँ आये तथा गांधारी को इस क्रूर कर्म से रोक दिया। महर्षिव्यास ने गान्धारी को आश्वासन देकर अपने वरदान की सार्थकता सिद्ध करने के लिए गांधारी के पेट से उत्पन्न उस मांसपिण्ड के सौ भाग कर उन्हें बढ़ने के लिए दो वर्ष के लिए घी से भरे हुए घड़ों में स्थापित कर दिया। इस प्रक्रिया में एक सौ एक भाग हो गये। यह देखकर गांधारी ने पुत्री के स्नेह संयोग का विचार करते हुए सोचा, निश्चय ही महर्षि व्यास के वरदान से मैं सौ पुत्रों की माता बन जाऊँगी किन्तु यदि मुझे एक पुत्री हो जाए तो मुझे परम संतोष होगा। गांधारी ने महर्षि व्यास से आजीवन अपने द्वारा आचरित सत्य-तप-दान-हवनादि सत्कर्मों के फल के रूप में एक पुत्री की प्राप्ति के लिए याचना की और निवेदन किया 'यदि मैंने सदा सत्य बोला हो, तप, दान अथवा हवन आदि किए हों तथा गुरुओं को प्रसन्न किया हो तो मुझे एक पुत्री प्राप्त हो।' महाभारत आदि पर्व।

गांधारी के मनोरथ को जानकर महर्षि वेदव्यास ने गांधारी को एक सुभग कन्या की प्राप्ति का वरदान दिया जिससे दौहित्र का योग भी होगा। यह कहकर महर्षि व्यास ने घी से भरे हुए घड़े में सौ से अतिरिक्त एक बचे हुए भाग को डाल दिया, जिससे अत्यन्त सुन्दरी एवं मनोऽनुसारिणी कन्या का प्रादुर्भाव हुआ। जिसे **दुःशला** नाम से भूषित किया गया। महाभारत ग्रन्थ में वर्णित गान्धारी की पुत्री विषयक कामना लोक में कन्या की कीर्ति बढ़ाने वाली एवं अपवादस्वरूपा है।

**- सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# वर्षर्तौ बहिःपरिमार्जनम्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

वर्षासु भूवाष्पान्मेघनिःस्यन्दान्मेघाच्छन्नजनितघर्मान्जनाः क्लान्ताः भवन्ति, आदानदुर्बले देहे च पक्ताऽपि दुर्बलो भवति। स पक्ता वर्षास्वनिलादीनां दूषणैः पुनः बाध्यते। कालेऽस्मिन् भूवाष्पान्मेघनिःस्यन्दाज्जलस्य चाम्ल-विपाकादग्निबले क्षीणे पवनादयः कुप्यन्ति विशेषेण त्वपथ्यसेविनां जनानाम्।

वर्षा में भूबाष्प (ग्रीष्म ऋतु में तपी हुई भूमि पर वर्षा का जल गिरने से निकलने वाली भाप), मेघनिःस्यन्द (बादलों के टपकने से उत्पन्न निरन्तर बनी रहने वाली आर्द्रता) और मेघाच्छन्न (बादलों से आच्छादित) जनित घर्म (उमस) से लोग क्लान्त होते हैं। आदानकाल के कारण दुर्बल देह में पाचनशक्ति भी दुर्बल हो जाती है। वह पाचनशक्ति वर्षा में वायु आदि दूषित करने वाले कारणों से पुनः बाधित होती है। इस समय भूमि की बाष्प और बादलों से पीने वाले जल का अम्लविपाक होने से अग्निबल के क्षीण हो जाने पर विशेषकर अपथ्य का सेवन करने वाले व्यक्तियों में वायु आदि दोष कुपित हो जाते हैं।

**सामान्यतया जनाः मेघाच्छन्नसमये तीक्ष्णमम्लं च कटूनि लवणानि च विशेषेणोपयुञ्जन्ति। तस्माद्वर्षासु साधारणः सर्वो विधिः शस्यते। वर्षाकाले जाठराग्नेः संरक्षणेन सह शरीरस्य त्वचः संरक्षणमपि विशेषेण करणीयम्, यतो हि वर्षाजनितक्लेदेन समुत्पन्नाः कीटपतङ्गास्तेनैव चाभिवर्धिताः विट्पङ्कक्लेदादिषु च सन्तिष्ठमानाः मक्षिका अपि त्वचं सन्दूषयन्ति, यदि चेत्त्वचि येन केनापि कारणेन सञ्जातः क्षतो विद्यते तदा त्वेते कीटपतङ्गादयः परमानन्दमनुभवन्ति, तस्मिन् क्षते प्रविशन्ति तत्रैव निवसन्ति स्वसन्ततिमुत्पादयन्ति मांसमेदोमज्जादीनाञ्च भक्षणङ्कुर्वन्ति। कालप्रभावात्सञ्जातेन घर्मेण स्विन्ना भवति त्वक्, कदाचिद्वर्षाजलेन क्लिन्नाऽनवधानतया च पङ्केन संलिप्ता ह्येषा त्वक् सन्दूषिता भवत्यस्मात्कारणादस्याः पुनः पुनः परिमार्जनं श्रेयस्करम्भवति। अविकृताप्येषा त्वग्विकृतितां नैवापद्येतेति कृत्वा वर्षाकाले विशेषेण बहिःपरिमार्जनम् करणीयम्।**

सामान्यतया लोग मेघाच्छन्न (बादलों से आच्छादित) समय में तीक्ष्ण, अम्ल, कटु और लवण द्रव्यों का विशेष रूप से उपयोग करते हैं। इसलिए वर्षा में समस्त साधारण विधि प्रशस्त होती है। वर्षाकाल में जाठराग्नि के संरक्षण के साथ शरीर की त्वचा का संरक्षण भी विशेष रूप से करना चाहिये, क्योंकि वर्षा से उत्पन्न क्लेद से समुत्पन्न कीट, पतङ्ग उससे ही अभिवर्धित होते हैं। मल, कीचड़, क्लेद आदि में मक्खियाँ बैठती हैं और त्वचा को दूषित करते हैं। यदि त्वचा में जिस किसी

कारण से क्षत उत्पन्न हो जाता है तब तो ये कीट, पतङ्ग आदि परमानन्द का अनुभव करते हैं और उस क्षत में प्रवेश करते हैं, वहीं रहते हैं, अपनी सन्तति का उत्पादन करते हैं और मांस, मेद, मज्जा आदि का भक्षण करते हैं। कालप्रभाव से उत्पन्न धूप से त्वचा स्विन्न हो जाती है, कदाचित् वर्षाजल से क्लिन्न होने से सावधानी से पङ्क से संश्लिष्ट ये सब त्वचा को सन्दूषित करते हैं। इस कारण से इसका पुनः पुनः परिमार्जन श्रेयस्कर होता है। अविकृत होते हुए भी इनसे त्वचा की विकृति नहीं होती। ऐसा करके वर्षाकाल में विशेष रूप से बहिःपरमार्जन करना चाहिए।

**वर्षाकाले घर्मश्चान्नविदाहश्च हेतुः पूर्वनिदर्शितः,**
**क्षारोष्णतीक्ष्णौषधमन्नपानं स्वेदो यवान्नं वमनं**
**उदमन्थं दिवास्वप्नमवश्यायं नदीजलम्**
**व्यायाममातपं चैव व्यवायं च वर्जयेत्।**
**पानभोजनसंस्कारान् प्रायः क्षौद्रान्वितान् भजेत्।**
**अभ्यङ्गांश्च प्रदेहांश्च परिषेकावगाहने**
**विभज्य शीतोष्णकृतं कुर्यात्।**

वर्षाकाल में उदमन्थ (जलप्रधान सत्तू का मन्थ), दिन में सोना, ओस, नदीजल, व्यायाम, धूप का सेवन और मैथुन नहीं करना चाहिये। पान एवं भोजन के संस्कारों को प्रायः क्षौद्रयक्त किए हुए को प्रयुक्त करना चाहिये। अभ्यङ्ग, प्रदेह, परिषेक और अवगाहन में शीत, उष्ण का विचार कर प्रयुक्त करना चाहिये।

**काश्चिच्चतुराः दक्षिणदेशीयाः कामिन्यस्तु प्रतिदिनमेव स्वेदापहारकं घर्मप्रभावनिवारकं त्वच्यं शीतं प्रलेपनङ्कुर्वन्त्यङ्गेषु विशेषेण तु मुखे। ताश्च प्रतिदिनमेव केशेषु बध्नन्ति सुगन्धितान् पुष्पगुच्छान्। केचित् पुरुषा अप्यङ्गेषु शीतद्रव्यविनिर्मितं लेपनङ्कुर्वन्ति, विशेषेण तु ललाटे चन्दनस्य प्रलेपेन सुशोभितास्ते विचरन्तीतस्ततः स्वकार्ये च निरताः घर्मस्य तिरोहणङ्कुर्वन्ति सुखमनुभवन्ति च।।**

दक्षिण प्रान्त की कुछ चतुर स्त्रियाँ तो प्रतिदिन ही स्वेद को दूर करने वाले एवं गर्मी के प्रभाव का निवारण करने वाले, त्वचा के लिए हितकारी अङ्गों में शीतल प्रलेप करती हैं विशेष रूप से तो मुख पर शीतल लेप करती हैं, वे स्त्रियाँ प्रतिदिन ही केशों में सुगन्धित पुष्पों को बाँधती हैं, कुछ पुरुष भी अपने अङ्गों पर शीत द्रव्य से निर्मित लेप को करते हैं, विशेष रूप से तो ललाट पर चन्दन का लेप करने से सुशोभित हुए इधर-उधर विचरण करते हैं और अपने काम में लगे हुए वे ग्रीष्म के प्रभाव से होने वाली विशेष प्रकार की गर्मी को तिरोहित करते हैं तथा सुख का अनुभव करते हैं।

**त्रिंशद्वर्षेभ्यः पूर्वन्तु राजस्थानप्रदेशीया उत्तरप्रदेशीयाश्चापि जनाः ग्रीष्मकाले तत्प्रभावापवारणार्थं तज्जनितारूंषिकानाञ्च निवारणार्थं 'मुलतानी मिट्टी' इति नाम्ना प्रसिद्धायाः मृत्तिकायाः तनु प्रलेपनङ्कुर्वन्ति स्म, विशेषेण तु ग्रामीणक्षेत्रेषु।**

30 वर्ष पहले तो राजस्थान-प्रदेश में रहने वाले और उत्तरप्रदेश में रहने वाले लोग भी ग्रीष्मकाल में उसके प्रभाव को अपवारित करने के लिए (दूर करने के लिए) तथा उस ग्रीष्म से उत्पन्न **अरूंषिकाओं** (फुंसियों) का

निवारण करने के लिए मुल्तानी मिट्टी इस नाम से प्रसिद्ध मिट्टी का पतला प्रलेप करते थे, विशेष रूप से तो ग्रामीण क्षेत्रों में (यह लेप किया करते थे)।

**विभिन्नेषु प्रसङ्गेषु त्वग्विकृतिविशेषेषु रक्तपित्तादिरोगेषु चाचार्यचरकेण निर्दिष्टानां विभिन्नानां लेपानां प्रदेहानाञ्चात्रोल्लेखः क्रियते। तेषां यथायोग्यं प्रयोगः भिषङ्निर्देशेन वृद्धजनानां वा निर्देशेन करणीयः।**

विभिन्न प्रसङ्गों में विशेष त्वचा की विकृतियों और रक्तपित्तादि रोगों में निर्दिष्ट विभिन्न लेपों तथा प्रदेहों का यहाँ उल्लेख किया जा रहा है। उनका यथायोग्य प्रयोग चिकित्सक के निर्देश या अनुभवी लोगों के निर्देश से करना चाहिये।

**लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयनप्रलेपनानाम्।**
**एला कुष्ठं दार्वी शतपुष्पा चित्रको विडङ्गश्च।**
**कुष्ठालेपनमिष्टं रसाञ्जनं चाभया चैव।।**(च.चि.7/84)

लामज्जक (छुइमुइ) और उशीर (खश) दाह, त्वग्दोष और स्वेद को दूर करने वाले श्रेष्ठ प्रलेप हैं। एला (इलायची), कुष्ठ (कूठ), दार्वी (दारुहल्दी), शतपुष्पा (सौंफ), चित्रक, वायविडङ्ग, रसाञ्जन और अभया (हरड़) का कुष्ठ में आलेपन हितकर है।

**कफे तु कृष्णासिकतापुराण-**
**पिण्याकशिग्रुत्वगुमाप्रलेपः।**
**कुलत्थशुण्ठीजलमूत्रसेक-**
**श्चण्डागुरुभ्यामनुलेपनं च।।७०।।**
**विभीतकानां फलमध्यलेपः**
**सर्वेषु दाहार्तिहरः प्रदिष्टः।**
**यष्ट्याह्वमुस्तैः सकपित्थपत्रैः**
**सचन्दनैस्तत्पिडकासु लेपः।।७१।।**
**रास्नावृषार्कत्रिफलाविडङ्गं**
**शिग्रुत्वचो मूषिकपर्णिका च।**
**निम्बार्जकौ व्याघ्रनखः सदूर्वा**
**सुवर्चला तिक्तकरोहिणी च।।७२।।**
**सकाकमाची बृहती सकुष्ठा**
**पुनर्नवा चित्रकनागरे च।**
**उन्मर्दनं शोफिषु मूत्रपिष्टं**
**शस्तस्तथा मूलकतोयसेकः।।७३।।**

(च.चि.12/70-73)

कफज शोथ में तो कृष्णा (छोटी पीपल), सिकता (बालू), पुरानी पिण्याक (खली), शिग्रुत्वचा (सहिंजन की छाल) और उमा (अलसी) का प्रलेप करना चाहिये। कुलत्थ (कुलथी) और शुण्ठी (सोंठ) का क्वाथ और मूत्र से परिषेक करना चाहिये। चण्डा (चोरपुष्पी) और अगुरु से अनुलेपन करना चाहिये। बिभीतक की फलमज्जा का लेप सभी प्रकार के शोथ में दाह और रुजा को नष्ट करने वाला कहा गया है। यष्टी (मुलेठी), मुस्त (नागरमोथा), कपित्थ (कैंथ) के पत्र और चन्दन से पिडकाओं में लेप करना चाहिये। रास्ना, वृष (अडूसा), अर्क, त्रिफला, विडङ्ग, शिग्रुत्वचा (सहिंजन की छाल) और मूषिकपर्णिका (मूषापर्णी), निम्ब (नीम), अर्जक (तुलसीभेद), व्याघ्रनख

(व्याघ्रनखी), दूर्वा (दूब), सुवर्चला (हुरहुर), तिक्तकरोहिणी (कुटकी), काकमाची, बृहती (बड़ी कटेरी), कुष्ठ, पुनर्नवा, चित्रक और नागर (सोंठ) का लेप कर गोमूत्र में पीसकर शोफ के रोगियों का उन्मर्दन तथा मूलकतोय (मूली के क्वाथ) से सेक प्रशस्त है।

**प्रदेहः सघृतश्श्रेष्ठः पद्मकोशीरचन्दनैः।**
**दूर्वामधुकमञ्जिष्ठाकेशरैर्वा घृताप्लुतैः।।८३।।**
**प्रपौण्डरीकनिर्गुण्डीपद्मकेशरमुत्पलम्।**
**कशेरुकाः पयस्या च ससर्पिष्कं प्रलेपनम्।।८४।।**

(च.चि.8/83-84)

पद्मक, उशीर और चन्दन के द्वारा घृत मिलाकर बनाया गया प्रदेह लाभदायक है। अथवा दूर्वा (दूब), मधुक (मुलेठी), मञ्जिष्ठा और केशर (नागकेशर) में घृत मिलाकर प्रदेह लगाना लाभदायक है। प्रपौण्डरीक, निर्गुण्डी, पद्मकेशर (कमलकेशर), उत्पल (नीलकमल), कशेरुक और पयस्या (क्षीरकाकोली) को घृत मिलाकर प्रलेप लगाना चाहिये।

**पिप्पल्यश्चन्दनं मुस्तमुशीरं कटुरोहिणी।**
**कलिङ्गकास्तामलकी सारिवाऽतिविषा स्थिरा।।२१९।।**
**द्राक्षामलकबिल्वानि त्रायमाणा निदिग्धिका।**
**सिद्धमेतैर्घृतं सद्यो जीर्णज्वरमपोहति।।२२०।।**
**क्षयं कासं शिरःशूलं पार्श्वशूलं हलीमकम्।**
**अंसाभितापमग्निं च विषमं सन्नियच्छति।।२२१।।**

(च.चि. ३/२१९-२२१)

पिप्पली, चन्दन, मुस्त (नागरमोथा), उशीर (खश), कटुरोहिणी (कुटकी), कलिङ्गक (इन्द्रजौ), तामलकी (भूमि आंवला), सारिवा, अतिविषा (अतीस), स्थिरा (सरिवन), द्राक्षा, आमलक, बिल्व, त्रायमाणा और निदिग्धिका (छोटी कटेरी) के द्वारा सिद्ध घृत जीर्णज्वर को सद्यः दूर करता है तथा क्षय, कास, शिरःशूल, पार्श्वशूल, हलीमक, अंसाभिताप और विषमाग्नि को दूर करता है।

**एतदतिरिक्तं स्थानविशेषेषु प्रचलितानां पारम्परिकप्रलेपानामपि प्रयोगः सुखावहः।**

इनके अतिरिक्त स्थानविशेष में प्रचलित पारम्परिक प्रलेपों का भी प्रयोग सुखदायक होता है।

- 80, सेनापति हाऊस के पीछे, प्रेम नगर,
झोटवाड़ा, जयपुर, मो. 9829077697

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

ए इन्फ्रास्ट्रक्चर लिमिटेड

एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

राष्ट्रीय विचारों के लिए पढ़ें

पाञ्चजन्य
साप्ताहिक

ORGANISER
Weekly



हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा



You can subscribe weeklies online through our
Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1000 (साधारण डाक द्वारा) | ORGANISER ₹1000 (by ordinary post) | विदेशों में $80 |
|---|---|---|---|

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

भारत प्रकाशन (दिल्ली) लिमिटेड
द एड्रेस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई- मेल : advt@bpdl.in

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,